ISSN :- 0974 - 8946

अनुसन्धान-प्रकाशन-विभागीया

त्रैमासिकी शोध-पत्रिका

शोध-प्रभा

(A REFEREED QUARTERLY RESEARCH JOURNAL)

४१ वर्षे द्वितीयोऽङ्कः (अप्रैलमासाङ्कः) २०१६ ई०

प्रधानसम्पादकः

प्रो० रमेशकुमारपाण्डेयः

कुलपतिः

सम्पादकः

प्रो० हरेरामत्रिपाठी

सहसम्पादकः

डॉ० ज्ञानधरपाठकः

प्रकाशन-स्थलम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्

(मानितविश्वविद्यालयः)

नवदेहली-११००१६

प्रकाशकः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्
(मानित-विश्वविद्यालयः)
कुतुब इन्स्टीट्यूशनल एरिया, नवदेहली-११००१६

ISSN :- 0974 - 8946

४१ वर्षे द्वितीयोऽङ्कः (अप्रैलमासाङ्कः) २०१६ ई०

मुद्रकः - **अमरप्रिंटिंगप्रैसः**, दिल्ली

शोध-प्रभा

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य अनुसन्धान-प्रकाशन-विभागीया पत्रिका

१. एषा त्रैमासिकी शोध-पत्रिका।

२. अस्याः प्रकाशनं प्रतिवर्षं जनवरी-अप्रैल-जुलाई-अक्टूबरमासेषु भवति।

३. अस्याः प्रधानमुद्देश्यं संस्कृतज्ञेषु स्वोपज्ञानुसन्धान-प्रवृत्तेरुद्बोधनं प्रोत्साहनं विविधदृष्ट्याऽनु-सन्धेयविषयाणां प्रकाशनं च विद्यते।

४. अस्यां श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठस्थानामन्येषां च विदुषां स्वोपज्ञविचारपूर्णा अनुसन्धानप्रधाननिबन्धाः प्रकाश्यन्ते।

५. अप्रकाशितानां दुर्लभानां प्राचीनाचार्यरचितानां लघुग्रन्थानां सम्पादनभावानुवादटीकाटिप्पण्यादि-पुरस्सरं प्रकाशनमप्यस्यां क्रियते।

६. प्रकाशित-निबन्धः पत्रिकायाः एक प्रतिः लेखकाय निःशुल्कं दीयते, यस्मिंस्तदीयो निबन्धः प्रकाशितो भवति।

७. अस्यां पत्रिकायां विशिष्टानां संस्कृत-हिन्द्याङ्ग्ल-ग्रन्थानां समालोचना अपि प्रकाश्यन्ते। आलोच्यग्रन्थस्यालोचना यस्मिन्नङ्के प्रकाशिता भवति सोऽङ्को ग्रन्थकर्त्रे निःशुल्कं दीयते किञ्च समालोचनापत्राण्यपि यथासौविध्यं दीयन्ते।

८. अस्याः वार्षिकसदस्यताराशिः १५०.०० रु० (पञ्चाशदुत्तरैकशतं रूप्यकाणि) सदस्यताराशिः **कुलसचिव, श्रीलालबहादुरशास्त्री-राष्ट्रिय-संस्कृत-विद्यापीठ,** नई दिल्ली-१६, इति सङ्केतेन (बैंकड्राफ्ट अथवा मनीआर्डर) द्वारा प्रेषणीयः।

९. पत्रिकासम्बन्धी सर्वविधः पत्रव्यवहारः 'सम्पादकः' 'शोध-प्रभा', श्रीलालबहादुरशास्त्री राष्ट्रिय-संस्कृतविद्यापीठ, कटवारिया सराय, नई दिल्ली-११००१६ इति सङ्केतेन विधेयः।

सम्पादकः

नैवेद्यम्

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठस्य शोधप्रभाख्या शोधपत्रिका विविधविषयगवेषणपूर्णानां निबन्धानां संग्रहं क्रोडीकृत्य विद्योततेतराम्। अनुसन्धानसरणिसम्पन्नानामाचार्याणां शोधार्थिनाञ्च शोधपूर्ण-निबन्धान् कलेवरीकृत्य संस्कृतवाङ्मयपरिपोषणे निमग्नेयम् आनन्दसागरे निमज्जयति विदुषो नितान्तम्।

जीवात्मन: बुद्धिना सह तादात्म्यं भवति वा उभयो: माध्यमेन अनुभवं वयं कुर्म: इत्यनेन सांख्यनये उभयो: विषये विप्रतिपत्तय: भवन्ति। बुद्धितत्त्वपुरुषयो: मध्ये क: कस्मिन् प्रतिबिम्बति इत्यत्र मतद्वयमस्ति। मतमेकं विद्यते वाचस्पतिमिश्रस्यापरं मतन्तु विज्ञानभिक्षो: विद्यते। वाचस्पतिमिश्रानुसारं बुद्धौ पुरुषस्य प्रतिबिम्बो भवति पुरुषे बुद्धे: प्रतिबिम्बो न भवति। मतेऽस्मिन् युक्तिर्विद्यते यत् कस्यापि प्रतिबिम्ब: तस्मिन् पदार्थे जायते य: पदार्थ प्रतिबिम्बं गृह्णाति। बुद्धितत्त्वस्य कर्तृत्वस्वभावत्वात् प्रतिबिम्बं गृह्णाति। अत: प्रतिबिम्बति तत्तत्त्वमिति। पुरुषे बुद्धे: प्रतिबिम्बो न जायते यतोहि स: कूटस्थो विद्यते अकर्तृत्वात् प्रतिबिम्बं न गृह्णाति। वाचस्पतिमिश्र: सांख्यकारिकाया: व्याख्याने तत्त्वकौमुद्यां वदति यत्- ''सोऽयं बुद्धितत्त्ववर्तिना ज्ञानसुखादिना तत्प्रतिबिम्ब-तस्तच्छायापत्त्या ज्ञानसुखादिमानिव भवति'' अत्र ''तत्प्रतिबिम्बित:'' 'तच्छायापत्त्या' उभयत्र तत्पदेन बुद्धितत्त्वं विवक्षितमस्ति। अत एव उक्तवाक्यस्यार्थो भवति। पुरुष: बुद्धौ प्रतिबिम्बितो भवति यस्मात् पुरुषे बुद्धितत्त्वस्य छायापत्ति: यद्वा सादृश्यस्य प्राप्तिर्भवति। तस्मात् ज्ञानसुखादिशून्यत्वेऽपि ज्ञानसुखादीनामाश्रय: पुरुषोऽस्ति इति प्रतीयते। ''तच्छायापत्त्या'' अस्यार्थं केचन टीकाकारा: कुर्वन्ति तत्तादात्म्यापत्त्या वा 'तदभेदापत्त्या' इति। वाचस्पतिमिश्रोऽत्र वदति बुद्धौ पुरुषस्य प्रतिबिम्बितत्वात् पुरुषे बुद्धितत्त्वस्य अभेद: प्रतीयते। अभेदस्य प्रतीयमानत्वात् बुद्धितत्त्वस्य अभेद: प्रतीयते। अभेदस्य प्रतीयमानत्वात् बुद्धिवृत्तिधर्मा: ज्ञानसुखादयश्च पुरुषे प्रतीयते। विज्ञानभिक्षुमतानुसारं पुरुषे बुद्धितत्त्वं प्रतिबिम्बितं भवति परन्तु बुद्धौ पुरुषस्य प्रतिबिम्बो न जायते। तैरुच्यते कस्यापि वस्तुन: प्रतिबिम्ब: तस्मिन् पदार्थे जायते य: प्रतिबिम्बस्य ग्रहणे अतिनिर्मल: स्यादिति। पुरुष: नि:सर्गत: निर्विकारत्वादतिनिर्मलो विद्यते। अत: तत्र प्रतिबिम्बस्योदयो भवितुमर्हति। बुद्धे: विकारित्वात् पुरुषवन्निर्मलत्वं तत्र नास्ति। पुरुषस्य निर्धर्मकत्वादपि बुद्धौ पुरुषस्य प्रतिबिम्बो न भवितुमर्हति। प्रतिबिम्ब: तत्रैव भवितुमर्हति य: प्रतिबिम्बग्राही पदार्थ: स्यादिति। पुरुष: छायारहित: निर्धर्मकश्च भवति अत: तस्य प्रतिबिम्ब: बुद्धौ जायते इति कथनं सम्यक् नास्ति। मतमिदं प्रकाशयन्नाह विज्ञानभिक्षु:-

तस्मिंश्चिद्दर्पणे स्फारे समस्ता वस्तुदृष्टय:।
इमास्ता: प्रतिबिम्बन्ति सरसीव तटद्रुमा:॥

यथा तडागस्य तटे विद्यमाना: वृक्षा: तडागे प्रतिबिम्बन्ति तथैव पुरुषे तत्समीवर्तिन्य: बुद्धे सर्वे वृत्तय: चिदात्मके पुरुषस्वरूपे दर्पणे प्रतिबिम्बन्ति। तडागतटद्रुमयो: मध्ये तटद्रुमाणामनिर्मलत्वात् तडाग: न तत्र प्रतिबम्बति अपितु तटद्रुमा: तडागे प्रतिबिम्बन्ति इति। एवं बुद्धितत्त्वस्य विकारित्वादनिर्मलत्वाच्च तत्र पुरुष: न प्रतिबिम्बति अपितु पुरुषे बुद्धि: प्रतिबिम्बति इति। अत एव पुरुषे बुद्धि: प्रतिबिम्बति इति मतस्य सिद्धिर्जायत इति। एवं रीत्या उभयो: मतयो: समालोचनेन शोधप्रविधे: उत्पत्तिर्भवति तदेवास्माकमुद्देश्यं विद्यत इति।

शोधप्रभाया: अस्मिन्नङ्के विविधविषयविश्लेषणपरा द्वादश लेखा: प्रकाश्यन्ते। एवं प्रतिभा-विशेषोद्भासितशोधपूर्णा संस्कृतसौरभं वितन्वतीयं विदुषां सन्तोषाय भविष्यतीति कामयमानोऽहं प्रमादादज्ञानाद्वा सञ्जातस्य दोषजातस्य प्रशमनार्थं निर्देशादिप्रदानैश्च उत्साहश्रिय: संवर्धनार्थमभ्यर्थये सुमनस: विदुष:।

प्रो. रमेशकुमारपाण्डेय:
कुलपति:

सम्पादकीयम्

''प्रमेयसिद्धिः प्रमाणाद्धि'' इति शास्त्रवचनात् सर्वप्रथमं प्रमाणस्य ज्ञानमपेक्षितं भवति। तत्र प्रमाकरणत्वं प्रमाणत्वमिति। यथार्थानुभवः प्रमा। अनुभवः द्विविधो भवति यथार्थानुभवः अयथार्थानुभवश्च। तत्र द्वितीयः त्रिविधो भवति संशयविपर्ययतर्कभेदादिति। तत्र तर्कस्तु 'व्याप्यारोपेण व्यापकारोपस्तर्क इति। पर्वतो वह्निमान् धूमादित्यत्र वह्न्यभावस्य आरोपेण धूमाभावस्य आरोपः क्रियते। तथा च पर्वतो यदि वह्न्यभाववान् स्यात्तर्हि धूमाभाववान् स्यादिति। आरोपपदार्थः आहार्य्यज्ञानं, बाधनिश्चयकालीनेच्छाजन्य- ज्ञानमाहार्यज्ञानमिति। तथा च आहार्यव्याप्यवत्ताभ्रमजन्य आहार्यव्यापकवत्ताभ्रमजन्यस्तर्क इति। प्रकृतस्थले आहार्यव्याप्यवत्ताभ्रमस्तु निर्वह्निः स्यादिति। तज्जन्यः आहार्यव्यापकवत्ताभ्रमः निर्धूमः स्यादिति। तर्कः द्विविधो भवति विषयपरिशोधको व्याप्तिग्राहकश्च। विषयपरिशोधकस्तु प्रकृतस्थले पर्वतः वह्न्यभाववान् स्यात् तर्हि धूमाभाववान् स्यादिति। व्याप्तिग्राहकस्तु धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति। यत्र तर्को भवति तत्र आपाद्यव्यतिरेकनिश्चयः कारणं भवत्येव अथ च आपाद्यापादकयोर्व्याप्तिनिश्चयोऽपि कारणं भवति। केचन वदन्ति प्रकारान्तरेण अपि तर्कस्य द्वैविध्यं स्वीक्रियते। साक्षाद् व्यभिचारशङ्कानिवर्तकः परम्परया च। धूमो यदि वह्निव्यभिचारी स्यात् वह्निजन्यो न स्यादिति प्रथमः। वह्न्यभाववान् स्यात् धूमाभाववान् स्यादिति तर्कोऽयं धूमवति वह्न्यभावस्य शङ्कां निवारयति व्यभिचारशङ्काञ्च निवारयति अत एव विषयपरिशोधकः। अन्ये वदन्ति तर्कः प्रकारान्तरेण पञ्चविधो भवति। आत्माश्रयान्योन्याश्रयचक्रकाऽनवस्थातदन्यबाधितार्थप्रसङ्गभेदात्। स्वस्य स्वापेक्षितत्वेऽनिष्टप्रसङ्गः आत्माश्रयः। तदपेक्षाऽपेक्षितत्वनिबन्धनोऽनिष्टप्रसङ्गोऽन्योन्याश्रयः। तदपेक्षाऽपेक्षाऽपेक्षितत्वनिबन्ध- नोऽनिष्टप्रसङ्गश्चक्रकम्। अव्यवस्थितपरम्परोपाधीनाऽनिष्टप्रसङ्गोऽनवस्था तद् यथा यदि घटत्वं घटजन्यत्वव्याप्यं स्यात् कपालसमवेतत्वव्याप्यं न स्यात्। तर्के त्रयः दोषा भवन्ति। इष्टापत्तिः, मूलशैथिल्यम्, विपर्यये तर्ककोटिमात्राऽपर्यवसानञ्चेति। ह्रदो निर्वह्निः यदि स्यात्तर्हि निर्धूमः स्यादिति तर्के प्रथमः दोषः। ह्रदो यदि निर्वह्निः स्यात् तर्हि द्रव्यं न स्यादिति मूलशैथिल्यदोषः। रूपं चक्षुरिताऽग्राह्यत्वे सति चक्षुर्ग्राह्यं न स्यात्तर्हि ग्राह्यं न स्यादिति तर्के तृतीयो दोषो भवति। आपादयामीत्यनुभवविषयतावच्छेदकतर्कत्वमपि जातिरेव इति केचित् वदन्ति। वस्तुतः पक्षे आपाद्यव्यापादकवत्तानिश्चयजन्यज्ञानं तर्कः। अत्र तत्त्वचिन्तामणिकारोऽपि वदति 'व्याप्तिग्रहमूलकत्वेनानवस्थेति चेन्न' यावदाशङ्कं तर्कानुसरणात्। यत्र च व्याघातेन शङ्कैव नावतरति तत्र तर्कं विनैव व्याप्तिग्रहः इति। नव्यास्तु तर्को यदि तर्कजन्यः स्यात्तदा तर्काऽजन्यजन्यो न स्यादित्येवमापत्तिः अनवस्था। अनवस्थाया अप्रामाणिकत्वे तस्याः परिहारस्तु संभवत्येव। तर्कः व्याप्तिग्राहकः क्वचिद् व्यभिचारशङ्कानिवर्तकोऽपि भवति। अत एव शोधकर्मणि अस्यात्यावश्यकता तु भवत्येव। तथा च विवृतिकारोऽप्याह।

तर्केण यस्य महतो भवतापहन्तु प्रामाण्यनिश्चयमहो कुरुते स धीरः।
यज्ज्ञानतो लभत एव जनः स मुक्तिं तं नौमि शङ्करमहं बहुतर्कवेद्यम्॥

विविधतर्कविश्लेषणपरा द्वादशलेखाः जिज्ञासूनां जिज्ञासानिवृत्तये निरूप्यन्तेऽत्र। विदुषां शोधकर्तॄणाञ्च कृते आत्मानुकूलवेदनीयं जनयन्तु ते लेखाः इति।

प्रो. हरेरामत्रिपाठी
शोधप्रकाशनविभागाध्यक्षः

विषयानुक्रमणिका

संस्कृतविभागः

हिन्दी विभाग

मानवाधिकारे वैदिकवाङ्मयस्यावदानम्

डॉ. सुन्दरनारायणझाः

यतो वा इमानि भूतानि जायन्ते। येन जातानि जीवन्ति। यत्प्रयन्त्यभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्म।[1] इत्यनया श्रुत्या जगत्कारणत्वं च ब्रह्मलक्षणमुक्तम्। तत्रापि प्राधान्येन जगदुत्पत्तिस्थितिलय- निमित्तोपादानब्रह्मप्रतिपादनं विहितम्। सृष्ट्यादावखिलाण्डकोटिब्रह्माण्डनायको भगवान् नारायणः स्वोदरस्थिताञ्जीवानुद्धर्तुं प्रकृतेः सकाशाद् रजोगुणं गृहीत्वा चतुर्मुखं ब्रह्माणमसृजत्। तदुक्तम्-

ससर्ज भगवानादौ त्रीन् गुणान् प्रकृतेः परः।
महत्तत्त्वं ततो विष्णुः सृष्टवान् ब्रह्मणस्तनुम्।।[2]

स परमात्मा नानाविधाः प्रजाः सिसृक्षुरभिध्यायापो जायन्तामित्यभिध्यानमात्रेणाप एव ससर्जेत्याह मनुः। तास्वप्सु बीजं शक्तिरूपमारोपितवान्। तद्बीजं परमेश्वरेच्छया हैममण्डमभवत्। यथा-

सोऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः।
अप एव ससर्जादौ तासु बीजमवासृजत्।।

तदण्डमभवद्धैमं सहस्रांशुसमप्रभम्।
तस्मिञ्जज्ञे स्वयं ब्रह्मा सर्वलोकपितामहः।।[3]

अमुमेव हिरण्मयाण्डादुद्भूतं सर्वलोकपितामहं ब्रह्माणमभिलक्ष्य श्रुतिराह-

हिरण्यगर्भः समवर्तताग्रे भूतस्य जातः पतिरेक आसीत्।
स दाधार पृथिवीं द्यामुतेमां कस्मै देवाय हविषा विधेम।।[4]

---

1. तै. उप.- 3/1
2. मणिमञ्जर्याम्- 1/2
3. मनुस्मृतौ- 1/8,9 श्लोकौ
4. ऋग्वेदे- 10/121/1

भगवतो नारायणस्य सृष्टियज्ञात्मके कर्मणि सर्वप्रथमं स्वत एवोद्भूतोऽयं ब्रह्मा स्वयम्भूरित्युक्तः। स्वयम्भूः सकाशाज्जातो मनुः स्वायम्भुवेति प्रोक्तः। **मन्-ज्ञाने** धातोः **शृस्वृस्निहित्रप्यसिवसिहनिक्लिदिबन्धिमनिभ्यश्च**[1] इत्युणादिसूत्रेण **उ**-प्रत्यये कृते सति मनुरिति शब्दो निष्पद्यते। मनुर्विषये श्रुतावेवमुक्तं यत्- **ये विद्वांसस्ते मनव**[2] इति। ब्रह्मपुत्रस्यास्य स्वायम्भुवमनोः षड्वंशप्रभवा अन्ये समानकार्यकारिणः स्वस्वकाले सृष्टिपालनादावधिकृताः स्वाः स्वाः प्रजा उत्पाद्य पालितवन्तः। ते यथा-

स्वारोचिषश्चोत्तमश्च तामसो रैवतस्तथा।
चाक्षुषश्च महातेजा विवस्वत्सुत एव च॥
स्वायम्भुवाद्या सप्तैते मनवो भूरितेजसः।
स्वे स्वेऽन्तरे सर्वमिदमुत्पाद्यमापुश्चराचरम्॥[3]

तस्य मनोरपत्यं पुमान् (मनु+अण्) मानवः, स्त्री च मानवी। मानव इति शब्दस्यानेके पर्यायाः सन्ति। यथा-

मनुष्या मानुषा मर्त्या मनुजा मानवा नराः।
स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषा नरः॥[4]

मनोरपत्यमित्यर्थे **मनोर्जातावञ्यतौ युक्** च[5] इत्यनेन सूत्रेण यत्प्रत्ययः षुमागमश्च मनोरित्याहुर्वैयाकरणाः। अत्र जातिश्च प्रत्ययान्तोपाधिः। मनोरपत्यं जातिश्चेदिति अपत्यमात्रविवक्षाया- मन्तरेण जातिं मानव इति भवति। **मत्वा कर्माणि सीव्यन्ति। मनस्यमानेन सृष्टाः। मनस्यतिः पुनर्मनस्वीभावे। मनोरपत्यं मनुषो वा**[6] इति यास्कः। मैत्रायण्यां तैत्तिरीयब्राह्मणेऽपि- **स (प्रजापतिः) पितॄन्सृष्ट्वा मनस्यैत्। तदनु मनुष्यानसृजत। तन्मनुष्याणां मनुष्यत्वम्**[7] इत्युक्तम्। महाभारते यथा-

मनोर्वंशो मानवानां ततोऽयं प्रथितोऽभवत्।
ब्रह्मक्षत्रादयस्तस्मान्मनोर्जातास्तु मानवाः॥[8]

---

1. पा.सू.- 1/10
2. श.प.ब्रा.- 8/6/3/18
3. मनुस्मृतौ- 1/62-63
4. अमरकोशे- नृवर्गे प्रथमः श्लोकः।
5. पा.सू.- 4/1/161
6. निरुक्ते- 1/3/2/7
7. मैत्रायण्याम्- 4/2/1; तैत्तिरीयब्राह्मणे- 2/3/8/3
8. महाभारते- 1/75/12-13

मानवाधिकारः

शब्दोऽयं मानवः अधिकारश्चेत्यनयोः शब्दयोर्योगेन निर्मितः। तत्र मानवशब्दः पूर्वं व्याख्यातः तस्य च मनोरपत्यस्य मनुगोत्रापत्यस्य वा मानवस्य कृते यः प्राकृतिकोऽधिकारो विहितस्स मानवाधिकार इत्युच्यते। अधिकारशब्दश्च **अधीत्युपसर्गपूर्वकात्कृधातोः घञ्प्रत्ययान्निष्पद्यते।** तदुक्तं साहित्यदर्पणे- **अधिकारः फले स्वाम्यधिकारी च तत्प्रभुः॥**[1] अर्थादधिकारशब्दोऽपि अधीक्षणम्, कार्यभारः, आधिपत्यम्, शक्तिः, स्वत्वम्, स्वामित्वमित्यादिष्वनेकेष्वर्थेषु प्रयुक्तोऽस्ति। आधुनिकचिन्तनपरम्परायां मानवाधिकारस्तादृशोऽधिकारोऽस्ति यन्मनुष्येभ्यो मानवजातेः सदस्यत्वान्निहितशक्तीनां विकासायावश्यकोऽस्ति। एतादृशोऽधिकारो यत्सर्वानपि स्त्रीपुरुषान् स्वभावतः प्राप्तोऽस्ति। मानवाधिकारस्य व्यवस्था शताब्दान्मानवजातिभिः स्वाधिकाराय कृतप्रयत्नस्य संघर्षस्य च परिणामोऽस्ति।

वर्त्तमानकाले प्रचलितो मानवाधिकारः।

यद्यपि वैदिकवाङ्मये मानवाधिकारस्य चर्चा कर्त्तव्यमुखेन विहिताऽस्ति। तद्विषयोपस्थापनात्प्राक् वर्त्तमानयुगे विश्वस्तरे प्रचलितमानवाधिकारविषये तावत्किञ्चिद्वच्मि। स्थानीय-राष्ट्रिय-अन्ताराष्ट्रियस्तरे च सञ्चालितानां समस्तानामान्दोलनानां विश्वबन्धुत्वसम्बद्धानाम् उद्घोषणानाञ्चैकमात्रमुद्देश्यमासीत् समग्रमानवजातेः सम्यक् विकासः कल्याणञ्च। तस्यैवैतत्फलं यन्मानवाधिकाराणां सर्वत्र समभावेन संस्थापनार्थं संयुक्तराष्ट्रसंघस्य स्थापना 24 अक्तूबर 1945 ई. वर्षे जाता। सर्वविधशान्तेरुपासको भारतदेशः संयुक्तराष्ट्रसंघस्य सक्रियः सदस्योऽस्ति। सर्वत्र शान्तिः स्यादेतदुपदेशबलाद्विश्व-गुरुपदमलङ्करोत्यस्माकं देशः। अस्माकं देशे बहुविधानि नीतिशास्त्राणि प्रचलितानि सन्ति। सर्वाण्यपि शास्त्राणि मानवकल्याणायैव प्रवृत्तानि सन्ति। द्विविधं मानवकल्याणमत्र वर्णितं लौकिकं पारलौकिकञ्च। तदुभयकल्याणसम्पादकशास्त्राणामध्ययने संरक्षणे च भारतीयाः कटिबद्धाः सन्ति। तस्माद्भारतीयं संविधानं सर्वदेशानां कृते मार्गदर्शकत्वेन प्रतिष्ठितमस्ति। तत्रोपदिष्टविधीनामनुपालनं सर्वदेशेषु स्यादित्यस्मिन्नेव क्रमे 18 दिसम्बर 1948 ई. वर्षे मानवाधिकारसम्बद्धं विश्वघोषणापत्रं प्रकाशितमभवत्। अत एव प्रतिवर्षं 10 दिसम्बरस्य तिथिः मानवाधिकारदिवसरूपेणास्माभिरनुष्ठीयते। घोषणापत्रेऽस्मिन् प्रस्तावनया सह त्रिंशदनुच्छेदाः सन्ति। ते यथा-

❖ **अनुच्छेदः- 1.** सर्वे मनुष्याः जन्मत एव गरिमदृष्ट्या अधिकारदृष्ट्या च स्वतन्त्राः समानाश्च सन्ति। तेभ्यो बुद्धिरन्तश्चेतनाश्च प्रदत्ताः सन्ति। तैः परस्परं भ्रातृत्वभावनया कार्यं कर्त्तव्यम्।

❖ **अनुच्छेदः- 2.** प्रतिव्यक्तिरस्यां घोषणायामुपवर्णितानां समस्तानामधिकाराणां स्वतन्त्रतानाञ्च कृते सन्त्यर्हाः, तत्र मूलवंश-वर्ण-लिङ्ग-भाषा-धर्म-राजनैतिकविचारा अन्ये च विचाराः, राष्ट्रियो वा सामाजिकोद्भवः, सम्पत्तिः, जन्माधारे अन्यपरिस्थित्याधारे वा न कश्चिद्विभेदो भविष्यति।

---

1. साहित्यदर्पणे- 296

एतदतिरिक्तं कमपि देशं राज्यक्षेत्रं वा तत्स्वाधीनं वा स्यात् न्यायाधीनं वा स्यात् अस्वशासितं वा स्यात् प्रभुतायां कमपि मर्यादाधीनं वा स्यात् राजनीतिकाधिकारिताविषयाधारे अन्ताराष्ट्रियप्रास्थित्याधारे वा तस्य देशस्य राज्यक्षेत्रस्य वा कस्माच्चिन्मानवात् कश्चिद्विभेदो न भविष्यति।

❖ **अनुच्छेद**:- **3.** प्रतिमानवं प्राणस्य स्वतन्त्रतायाः दैहिकसुरक्षायाश्चाधिकारोऽस्ति।

❖ **अनुच्छेद**:- **4.** कमपि मानवं दासत्वेन परतन्त्रत्वेन च नैव स्थापयिष्यते, सर्वविधो दासत्वभावः दासव्यापारश्च प्रतिषिद्धो भविष्यति।

❖ **अनुच्छेद**:- **5.** कमपि मानवं यन्त्रणां न प्रदास्यते, तेन सह क्रूरामानवीयापमानजनको वा व्यवहारो न भविष्यति, उतवा न तादृशो दण्ड एव देयो भविष्यति।

❖ **अनुच्छेद**:- **6.** प्रत्येकं मानवं सर्वत्र विधिसमक्षं मानवरूपे मान्यताया अधिकारो भविष्यति।

❖ **अनुच्छेद**:- **7.** सर्वे जनाः विधिसमक्षं समानाः सन्ति, कमपि विभेदं विना विधेः समानसंरक्षणस्याधिकारिणः सन्ति। सर्वेऽपि मानवा अस्याः घोषणाया अतिक्रमणे, विभेदविरुद्धे, एतादृग्विभेदोद्दीपनविरुद्धे च समानसंरक्षणस्याधिकारिणः सन्ति।

❖ **अनुच्छेद**:- **8.** प्रतिमानवं संविधानेन विधिना वा प्रदत्तमूलाधिकाराणामति-क्रमणकारिकार्यविरुद्धे सक्षमराष्ट्रियाधिकरणैः प्रभावपूर्णस्योपचारस्याधिकारोऽस्ति।

❖ **अनुच्छेद**:- **9.** कमपि मानवं स्वेच्छया नियमविरुद्धतया च निगडितं निर्वासितं वा नैव कर्तुं शक्यते।

❖ **अनुच्छेद**:- **10.** प्रत्येको मानवः स्वाधिकाराणां बाधानां वा तद्विरुद्धापराधिकारोपावधारणे च पूर्णतया समानरूपेण स्वतन्त्रो निष्पक्षाधिकरणैः ऋजुवृत्तान्तश्रवणाय सार्वजनिकवृत्तान्तश्रवणाय चाधिकृतोऽस्ति।

❖ **अनुच्छेद**:- **11.** (1) तादृशं मानवं यमुपरि दाण्डिकापराधस्यारापोऽस्ति, एषोधिकारोऽस्ति यत्तं तावन्निरपराधं मंस्यते यावत्तं लोकविचारणे (न्यायालये) यत्र तं स्वात्मप्रतिरक्षार्थम् आवश्यकं साक्ष्यमुपलभ्येत विध्यनुसारं दोषयुक्तं (दुष्टं) न साध्यते।

(2) कमपि मानवं कस्माच्चित् कार्यात् लोपकारणाद्वा यत्क्रियमाणकाले राष्ट्रियमन्ताराष्ट्रियविध्यधीनं वा दाण्डिकमपराधं नासीत्, कस्मैचिद्दाण्डिकापराधाय दोषयुक्तमभिनिर्धारितं नैव कर्तुं शक्ष्यते। तस्माद्दण्डादधिकदण्डायारोपितं नैव करिष्यते यत्तदानीं प्रचलितमासीत् यदाऽपराधः कृतः।

❖ **अनुच्छेद**:- **12.** कस्यापि मानवस्यैकान्तभावेन, कुटुम्बेन, गृहेण, पत्रव्यवहारेण सह च स्वैरो हस्तक्षेपो न करिष्यते, तस्य सम्मानमुपरि ख्यातिमुपरि च प्रहारो न भविष्यति। प्रत्येकं

मानवं तादृशस्य हस्तक्षेपस्य प्रहारस्य वा विरुद्धे विधिसंरक्षणस्याधिकारोऽस्ति।

❖ **अनुच्छेदः**- 13. (1) प्रतिमानवं प्रतिराज्यसीमान्तर्गतसञ्चरणस्य निवासस्य च स्वतन्त्रताया अधिकारोऽस्ति।

(2) सर्वे मानवाः स्वदेशमन्यं वा देशं परित्यक्तुं स्वदेशे पुरागमनाय चाधिकृताः सन्ति।

❖ **अनुच्छेदः**- 14. (1) सर्वेऽपि मानवा उत्पीडनवशादन्यस्मिन् देशे शरणं याचयितुं प्राप्तुं वाधिकृताः सन्ति।

(2) अस्याधिकारस्यावलम्बनं राजनीतिकेतरापराधेभ्यः संयुक्तराष्ट्रसंघस्य प्रयोजनानां सिद्धान्तानाञ्च प्रतिकूलकार्येभ्यः वास्तविकरूपेणाद्भुताभियोजनदशायां नैव गृहीतुं शक्ष्यते।

❖ **अनुच्छेदः**- 15. (1) प्रत्येकं मानवं राष्ट्रियताया अधिकारो भविष्यति।

(2) कमपि मानवं स्वेच्छया तस्य राष्ट्रियतातो राष्ट्रियतापरिवर्तयितुमधिकाराच्च वञ्चितं कर्तुं शक्ष्यते।

❖ **अनुच्छेदः**- 16. (1) पूर्णवयस्काः स्त्रीपुरुषाश्च मूलवंश-राष्ट्रीयता-धर्मकारणाच्च काञ्चिदपि सीमां विनैव विवाहं कर्तुं कुटुम्बं स्थापयितुञ्चार्हाः सन्ति।

(2) ते विवाहविषये विवाहितजीवनकाले तद्विघटने च समानाधिकारायाधिकृताः सन्ति।

❖ **अनुच्छेदः**- 17. (1) प्रत्येकमप्येकाकिना अन्येभ्यो जनेभ्यः सम्मिल्य वा सम्पत्तेः स्वामित्वमधिगन्तुमर्हाः सन्ति।

(2) कमपि मानवं तत्सम्पत्तिभ्यः स्वेच्छया वञ्चितं नैव कर्तुं शक्ष्यते।

❖ **अनुच्छेदः**- 18. प्रत्येकमपि विचारस्य अन्तःकरणस्य (चेतनायाः) धर्मस्वातन्त्र्यस्य चाधिकारोऽस्ति। एतदधिकारान्तर्गतं स्वधर्मं विश्वासं वा परिवर्तयितुं स्वातन्त्र्यं वैयक्तिकस्तरे सामाजिकस्तरे चैकाकिना अन्येभ्यो जनेभ्यो मिलित्वा सार्वजनिकरूपेण वा शिक्षयितुमभ्यस्तुं व्यवहर्तुमर्चितुं पालयितुं वा स्वधर्मं विश्वासं वा प्रकटयितुं स्वातन्त्र्यमस्ति।

❖ **अनुच्छेदः**- 19. प्रत्येकमप्यभिमतं प्रदातुमभिव्यक्तेश्च स्वातन्त्र्यमस्ति। एतदधिकारान्तर्गतं हस्तक्षेपं विनैवाभिमतं प्रस्थापयितुं केनापि सञ्चारमाध्यमेन सीमाविचारं विना वा सूचनानामादानप्रदानयोः स्वातन्त्र्यमस्ति।

❖ **अनुच्छेदः**- 20. (1) प्रत्येकमपि शान्तिपूर्वकं सम्मेलनाय संघटनाय च स्वातन्त्र्यस्याधिकारोऽस्ति।

(2) कमपि जनं कस्मिंश्चित्सम्मेलने संघटने वा सम्मेलयितुं न कश्चिद्विवशीकर्तुमधिकृतोऽस्ति।

❖ **अनुच्छेदः- 21. (1)** प्रत्येकमपि स्वदेशस्य सर्वकारे (शासने) प्रत्यक्षतया स्वतन्त्रतापूर्वकं निर्वाचितप्रतिनिधिमाध्यमेन वा भागं गृहीतुमधिकृतोऽस्ति।

(2) प्रत्येकमपि जनः स्वदेशस्य लोकसेवायां तुल्यमधिकारं संधत्ते।

(3) लोकमतं सर्वकारीयप्राधिकारस्याधारो भविष्यति। अस्याभिव्यक्तिः कालबद्धेषु वास्तविकनिर्वाचनेषु भविष्यति, यानि निर्वाचनानि सार्वभौमिकैः समानमताधिकारैः गुप्तमतदानैः समतुल्यस्वतन्त्रमतदानप्रक्रियाभिश्च सम्पादितानि भविष्यन्ति।

❖ **अनुच्छेदः- 22.** प्रत्येकं जनः समाजस्य सदस्यत्वेन सामाजिकसुरक्षामाप्तुमधिकृतो वर्तते। स च राष्ट्रियप्रयासेनान्ताराष्ट्रियसहयोगेन प्रतिराज्यगठनं संसाधनानुसारञ्च तादृशान् समस्तानप्यार्थिकसामाजिक- सांस्कृतिकाधिकारानवाप्तुमर्हो भवति यत्तस्य गरिमायाः व्यक्तित्वस्य चोन्मुक्तविकासायानिवार्या भवन्ति।

❖ **अनुच्छेदः- 23. (1)** प्रत्येकमपि कार्यं कर्तुं, नियोजनानां स्वतन्त्रचयनस्य, कार्याणां न्यायोचितस्थितीनाम् कार्याणामनुकूलदशानां, निर्वृत्तितानां विरुद्धे संरक्षणमवाप्तुमधिकारो वर्तते।

(2) प्रत्येकमपि किमपि विभेदं विना समानकार्याय समानवेतनस्याधिकारो वर्तते।

(3) प्रत्येकमपि जनं यो कार्यं करोति तमेतादृशं न्यायोचितमनुकूलं पारिश्रमिकञ्च प्राप्तुमधिकारोऽस्ति येन तस्य स्वात्मानः स्वकुटुम्बस्य च मानवगौरवानुरूपं जीवनं सुनिश्चितं स्यात् तथा चावश्यके सति सामाजिकसंरक्षणस्य विविधसाधनैस्तमनुपूरयितुं शक्येत।

(4) प्रत्येकमपि स्वहितं संरक्षयितुं व्यावसायिकसंघनिर्मातुं तत्र स्वात्मानं नियोजयितुञ्चाधिकारो वर्तते।

❖ **अनुच्छेदः- 24.** प्रत्येकमपि विश्रामस्यावकाशस्य चाधिकारो वर्तते। यस्यान्तर्गतं कार्यहोराणां युक्तियुक्तसीमायाः पारिश्रमिकेन सह नियतावधिकावकाशाश्चापि सन्ति।

❖ **अनुच्छेदः- 25. (1)** प्रत्येकमपि तादृग्जीवनस्तरस्याधिकारोऽस्ति यत्तस्य स्वकीयस्य स्वकुटुम्बस्य च स्वाथ्यसंरक्षणाय कल्याणाय च पर्याप्तं स्यात्, तदन्तर्गतं भोजनं, वस्त्रम्, आवासः, चिकित्सा, आवश्यकसामाजिकसेवाश्च सन्ति। निर्वृत्तितायां, रुग्णतायां, अशक्ततायां, वैधव्ये, वृद्धावस्थायां तथा च तस्य नियन्त्रणरहितासु परिस्थितिषु जीवनयापनाभावदशायां सुरक्षायाः पूर्णोऽधिकारो वर्तते।

(2) मातृत्वं बाल्यकालविशेषञ्च पालनाय साहाय्याय विशेषरूपेणार्हो भवति। अवैधा वैधाश्च सर्वेऽपि बालकाः समानं सामाजिकसंरक्षणमवाप्तुमर्हाः भवन्ति।

❖ **अनुच्छेदः- 26. (1)** सर्वेभ्यो मानवेभ्यः शिक्षाया अधिकारोऽस्ति। न्यूनतमं प्राथमिकस्तरे मौलिकस्तरे च शिक्षा शुल्करहिता भविष्यति। तत्र प्राथमिकशिक्षा त्वनिवार्या भविष्यति।

प्रौद्योगिकी (तकनीकि) शिक्षा, वृत्तिक (व्यावसायिक) शिक्षायाः समुपलब्धता साधारणतया भविष्यति, उच्चशिक्षा च सर्वेभ्यो मानवेभ्यो गुणागुणाधारे समानरूपेण लभ्या भविष्यति।

(2) शिक्षाया लक्ष्यं मानवव्यक्तित्वस्य पूर्णविकासो मानवाधिकाराणां मूलस्वातन्त्र्याणाञ्च कृते सम्मानवर्द्धिका भविष्यति। शिक्षैषा समस्तराष्ट्राणां मूलवंशविषयकानां धार्मिकसमूहानाञ्च मध्ये आदरस्य सहिष्णुतायाः सख्यभावस्य चाभिवृद्धये समुद्दिष्टा भविष्यति, सर्वत्र शान्तिस्थापनाय संयुक्तराष्ट्रसंघस्य कार्यकलापानग्रेसारयिष्यति।

(3) स्वीयान् बालकान् शिक्षयितुं विषयनिर्धारणे किं शास्त्रं पाठनीयं किं न पाठनीयमिति चयने पितरौ पूर्णरूपेणाधिकृतौ भविष्यतः।

❖ **अनुच्छेदः- 27. (1)** प्रत्येकमपि मानवं समुदायस्य सांस्कृतिकजीवने मुक्तरूपेण भागं गृहीतुं कलानामानन्दगृहीतुं वैज्ञानिकप्रगतौ तल्लाभेषु च भागग्रहणाधिकारो वर्तते।

(2) स्वनिर्मितानां वैज्ञानिक-साहित्यिक-कलात्मककृतीनां परिणामस्वरूपं सम्भावितानां नैतिकभौतिकहितानां संरक्षणे सर्वेऽप्यधिकृताः सन्ति।

❖ **अनुच्छेदः- 28.** अस्यामभिघोषणायां वर्णितानामधिकाराणां स्वातन्त्र्याणाञ्च प्राप्तये सामाजिकान्ताराष्ट्रिय- व्यवस्थायाञ्च पूर्णतया एतानधिगन्तुं प्रत्येकमपि जनोऽर्हिष्यते।

❖ **अनुच्छेदः- 29. (1)** प्रत्येकं जनः तत्समुदायं प्रति कर्त्तव्यपरायणो भवेत् यत्र तस्य व्यक्तित्वस्य पूर्णस्वतन्त्रविकासः संभवेत्।

(2) सर्वेषामुपरि स्वाधिकाराणां स्वातन्त्र्याणाञ्च प्रयोगे सैव मर्यादा भविष्यति या खल्वन्येषामधिकाराणां स्वातन्त्र्याणाञ्च समीचीनां मान्यतां सम्यक् सम्मानं च सुनिश्चितीकर्तुं प्रजातन्त्रात्मके समाजे नैतिकतायाः लोकव्यवस्थायाः साधारणकल्याणस्य च न्यायोचिता अपेक्षाः पूरयितुं विध्यनुकूला स्यात्।

(3) कस्यामपि दशायामेतेषामधिकाराणां स्वातन्त्र्याणाञ्च प्रयोगः संयुक्तराष्ट्रसंघस्य सिद्धान्तान् विरुध्य न भविष्यति।

❖ **अनुच्छेदः- 30.** अस्याः घोषणायाः न कोऽप्यंशः तथा व्याख्येयो भविष्यति येनेदं स्पष्टं भवेद्यदत्र कस्मैचिदपि राज्याय समूहाय व्यक्तिविशेषाय वा कश्चित्तादृशः क्रियाकलापः अधिकारो वा विवक्षितो वर्तते यस्य लक्ष्यमत्रोपवर्णितेष्वधिकारेषु स्वातन्त्र्येषु च कस्यचिद्विनाशोऽस्तीति।

वैदिकवाङ्मये मानवाधिकारसूत्राणि

विदितमेवास्ति यत्समस्तविश्ववाङ्मयस्य मूलस्रोतांसि वेदा एव सन्ति। वेदेषु सर्वविधज्ञानविज्ञानसूत्राणि सन्ति विद्यमानानि। वेदानां विषये भगवता मनुना प्रोक्तं यत् **सर्वज्ञानमयो**

हि सः[1] इति। मानवानां सर्वविधकल्याणाय प्रवृत्ताः सन्ति। मन्त्रब्राह्मणारण्यकोपनिषदितिहासपुराणधर्मशास्त्राणि षड्वेदाङ्गानि च वैदिकवाङ्मयान्तर्गतान्येव सन्ति। वैदिकवाङ्मयेषु श्रेयःशास्त्रं प्रेयःशास्त्रञ्चोभयं समभावेन समेधितम्। तस्मात्समस्तानां धर्माणां मूलत्वेन वेदाः स्तुताः सन्ति। विश्वकल्याणाय सर्वविधसूत्रवर्णनपुरस्सरमखिलं विश्वमेकरूपं कर्तुं वेदेषु **यत्र विश्वं भवत्येकनीडम्**[2] इति सूत्रं निर्दिष्टमस्ति। अमुमेव सूत्रमभिलक्ष्य संयुक्तराष्ट्रसंघेन मानवाधिकारमाध्यमेन समस्तं विश्वमेकीकर्तुं विश्वघोषणापत्रं प्रकाशितम्। मानवाधिकाराणां जागत–अभिघोषणापत्रे यानि तथ्यान्यूररीकृतानि तानि सर्वाणि वैदिकवाङ्मयस्यावदानान्येव सन्तीति कथने नातिशयोक्तिर्भविष्यति। इतः पूर्वं मानवाधिकाराणां जागत–अभिघोषणापत्रोक्तानि त्रिंशदनुच्छेदेषूपवर्णितानि तथ्यानि प्रस्तुतानि, साम्प्रतं तेषां सूत्राणि वैदिकवाङ्मये कुत्र कथञ्चोपदिष्टानि सन्तीति ब्रूमहे। आशासे विद्वांसो मच्छोधसरण्या सन्तुष्टाः सन्तो मानवाधिकाराणां जागत–अभिघोषणापत्रस्य वैदिकवाङ्मयादवदातत्वप्रतिपादनेन सहैकमता भविष्यन्ति। मानवाधिकाराणां जागत–अभिघोषणापत्रे प्रस्तुतानुच्छेदानक्रमेणात्र वेदोक्तानि सूत्राण्युपस्थाप्यन्ते–

- **अनुच्छेदः–1**
  - **परस्परं भावयन्तः श्रेयः परमवाप्स्यथ। –गीता–3/11**
  - **नूनं जनाः सूर्येण प्रसूताः। –ऋ.सं.–7/63/4**
  - **मित्रस्य चक्षुषा समीक्षामहे। – शु.य.सं.–36/18**
  - **मा भ्राता भ्रातरं द्विक्षन् मा स्वसारमुतस्वसा। –अ.सं.–3/30/3**
- **अनुच्छेदः–2**
  - **पुरुष एवेदं सर्वम्। –शु.य.सं.–31/2**
  - **सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः। –प्रसिद्धसूक्तिः**
  - **स्त्री चाविशेषात्। –का.श्रौ.सू.–1/1/7**
  - **रथकारस्याधाने। '' –1/1/9**
  - **निषादस्थपतिर्गावेधुकेऽधिकृतः। '' –1/1/12**
  - **सर्वेषामविशेषात्। '' –1/1/3**

1. मनुस्मृतौ– 2/7
2. शु.य.सं.– 32/8

- **अनुच्छेदः-3**
  - **प्राणो हि भूतानामायुः। -तै.सं.-8/3/1**
  - **प्राणः प्रजानामुदयत्येष सूर्यः। -मै.उप.-6/8**
  - **प्राणं सूर्य उपासते। -अ.सं.-11/4/12**
  - **तनूषु विश्वा भुवनानि येमिरे। -ऋ.सं.-10/56/5**
- **अनुच्छेदः-4**
  - **न मे दासो नार्यो महित्वा। -अ.सं.-5/11/3**
- **अनुच्छेदः-5**
  - **सर्वभूतेषु चात्मानम्। -शु.य.सं.-40/6**
  - **सर्वभूतानि तृप्यन्तु। -बौ.ध.सू.-25/9/14**
  - **सर्वभूतहिते रताः। -गीता-5/24**
  - **असंबाधं मध्यतो मानवानाम्। -अ.सं.-10/191/3**
  - **मा हिंसीः पुरुषं जगत्। -शु.य.सं.-16/3**
  - **तत्र हिंसा नाम मनोवाक्कायकर्मभिः सर्वभूतेषुसर्वदा क्लेशजननम्। -शाण्डिल्योप.-1/1**
- **अनुच्छेदः-6**
  - **समानार्षेयोऽहं भोः। -शां.गृ.सू.-2/2/7**
  - **विश्वामित्रस्य रक्षति रक्षेदं भारतं जनम्। -ऋ.सं.-3/53/12**
- **अनुच्छेदः-7**
  - **समानो मन्त्रः समितिः समानी। - ऋ.सं.-10/191/3**
  - **राजा राष्ट्रं विरक्षति। -अ.सं.-11/5/17**

- **अनुच्छेदः–8**
    - **स्वयं श्रथ्नानो वरुणस्य पाशाद्। –अ.सं.–11/1/15**
    - **मुञ्चन्तु मा शपथ्यात्। –ऋ.सं.–10/97/16**
- **अनुच्छेदः–9**
    - **मुच्यमानो निरेनसः। –अ.सं.–12/2/12**
- **अनुच्छेदः–10**
    - **शृणुतं म इमं हवम्। –ऋ.सं.–8/73/10**
    - **शृणोत नः सुमतिं यज्ञियासः। –मै.सं.–4/14/9**
    - **शृण्वतो देवा अवसे स्वस्तये। –ऋ.सं.–10/63/11**
- **अनुच्छेदः–11**
    - **अनागो हत्या वै भीमा कृत्ये। –अ.सं.–10/1/29**
    - **अनाधृष्टं देवकृतं यदेनः। –मै.सं.–4/14/17**
    - **मा राजप्रेषितो दण्डः। –पा.गृ.सू.–3/15/20**
- **अनुच्छेदः–12**
    - **मा मा हिंसीरधिगतं पुरस्तात्। –आप.श्रौ.सू.–7/6/5**
    - **मा मे प्रजया मा पशूनां मा मम प्राणैरप प्रसृप मोत्सृप। –तै.आर.–1/14/2-4**
- **अनुच्छेदः–13**
    - **सर्वा दिशो अभयास्ते भवन्तु। –अ.सं.–19/45/4**
    - **सर्वा दिशः पुरुष आबभूव। –अ.सं.–10/2/28**

- **सर्वात्मा सर्वाः प्रजा सत्रैकं भवन्ति। -तै.आ.-3/11/2**
- **पुनरस्ति निवर्तनम्। -अ.सं.-3/6/7**

- **अनुच्छेदः-14**
  - **सर्वा लोकान् परिभूर् भ्राजमानः। -अ.सं.-13/2/10**
  - **सर्वा लोकान् अनृणा सञ्चरेमहि। -मा.श्रौ.सू.-25/2/22**

- **अनुच्छेदः-15**
  - **राष्ट्राय मह्यं बध्यताम्। -अ.सं.-1/29/4**
  - **राष्ट्रं रोह च द्रविणं च रोह। -अ.सं.-13/1/34**
  - **मा त्वद्राष्ट्रमधिभ्रशद्। -शु.य.सं.-12/11**

- **अनुच्छेदः-16**
  - **तस्मादु समानादेव पुरुषाद् अत्ता चाऽऽद्यः च जायते इदं हि चतुर्थे पुरुषे तृतीये सङ्गच्छामहऽइति विदेवं दीव्यमाना जात्या आसते। -श.प.ब्रा. -1/8/3/6**
  - **स्वयं यजस्व स्वयं जुषस्व। -शु.य.सं.-32/15**
  - **इच्छयाऽन्योन्यसंयोगः कन्यायाश्च वरस्य च। गान्धर्वः स तु विज्ञेयो मैथुन्यः कामसम्भवः॥ -मनु.-3/32**

- **अनुच्छेदः-17**
  - **रयिं मे दाः। -अ.सं.-19/31/12**
  - **रयिं मे विश्वे नियच्छन्तु देवाः। -अ.सं.-18/3/11**
  - **रयिं नो देहि यज्ञियम्। -मै.सं.-4/10/5**
  - **रयिं नो देहि जीवसे। -शां.श्रौ.सू.-3/15/4**

- वयं स्याम पतयो रयीणाम्। -शु.य.सं.-10/20
- अथानो वर्धया रयिम्। -शु.य.सं.-3/14
- मा वयं रायस्पोषेण वियौष्म। -शु.य.सं.-4/22

- अनुच्छेदः-18
  - धर्मो मा धर्मणः पातु। -मै.सं.-1/5/4
  - धर्मो मे जनपदे चर्यताम्।-कौशि.सू.-17/19
  - धर्मेण पापम् अप नुदन्ति। -तै.आर.-10/63/1
- अनुच्छेदः-19
  - यद् वदामि मधुमत् तद् वदामि। -अ.सं.-12/1/58
  - यद् वाग् वदन्त्यविचेतनानि। -ऋ.सं.-8/100/10
  - यद् वाचो यच्च मे हृदः। -का.सं.-34/19
- अनुच्छेदः-20
  - सभा च मा समितिश्चावताम्। -अ.सं.-7/12/1
  - सभ्य सभां मे पाहि। -अ.सं.-19/55/6
  - सङ्गत्यां सुमना असत। -ऋ.सं.-10/141/4
  - सङ्गच्छध्वं संवदध्वम्। -ऋ.सं.-10/191/2
- अनुच्छेदः-21
  - राजा न मित्रं प्रमिणाति धीरः। -ऋ.सं.-9/97/30
  - राजा न सत्यः समितीरियानः। -ऋ.सं.-9/92/6
  - तत्र माममृतं कृधि। -ऋ.सं.-9/113/8

- **आ त्वा हार्षमन्तरेधि ध्रुवस्तिष्ठाविचाचलिः। विशस्त्वा सर्वा वाञ्छन्तु मा त्वद्राष्ट्रमधिभ्रशत्॥**

  इहैवैधि माप च्योष्ठाःपर्वत इवाविचाचलिः। इन्द्र इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय॥

  इममिन्द्रो अदीधरद् ध्रुवं ध्रुवेण हविषा। तस्मै सोमो अधि ब्रवत् तस्मा उ ब्रह्मणस्परि॥

  ध्रुवा द्यौर्ध्रुवा पृथिवी ध्रुवासः पर्वता इमे। ध्रुवं विश्वमिदं जगद् ध्रुवो राजा विशामयम्॥

  ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः। ध्रुवं त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां ध्रुवम्॥

  ध्रुवं ध्रुवेण हविषाऽभि सोमं मृशामहि। अथोत इन्द्रः केवलीर्विशो बलिहृतस्करत्॥

  -ऋ.सं.-10/173/1-6

- **अनुच्छेदः-22**
  - **सर्वतः परिरक्षतु।-ऋ.सं.(खिलकाण्डे)-10/127/11**
  - **शर्म विश्वमिदं जगत्। -तै.आ.-4/1/1**
  - **शर्म यच्छत् द्विपदे चतुष्पदे। -ऋ.सं.-10/37/11**
- **अनुच्छेदः-23**
  - **युजो युज्यन्ते कर्मभिः। -शु.य.सं.-23/37**
  - **युजे वां ब्रह्म पूर्व्यं नमोभिः। -शु.य.सं.-11/5; ऋ.सं.-10/13/1**
  - **युजो युक्ति अभि यत् संवहन्ति। -ऐ.आर.-2/3/8/2,3**
  - **समानम् अन्नेनाप्यायस्व। -तै.आर.-10/36/1**

- समानम् अर्थं वितरित्रता मिथः। -ऋ.सं.-1/144/3
- समानम् अर्थं चरणीयमाणा। -ऋ.सं.-3/61/3
- समानं मन्त्रम् अभिमन्त्रये वः। -ऋ.सं.-10/191/3
- समानां राजा विभृतः पुरुत्रा। -ऋ.सं.-3/55/4
- एतदतिरिक्तं सोमयागे ऋत्विजां दक्षिणाविभागो द्रष्टव्यः। यथा- यथारम्भं द्वादश द्वादश आद्येभ्यः (ब्रह्मोद्गातृहोत्रध्वर्युभ्यः), षट् षड्द्वितीयेभ्यः (ब्राह्मणच्छं- सिप्रस्तोतृमैत्रावरुणप्रस्थातृभ्यः), चतस्रश्चतस्रस्तृतीयेभ्यः (पोतृप्रतिहर्त्रच्छा- वाकनेष्टृभ्यः), तिस्रस्तिस्र इतरेभ्यः (अग्नीत्सुब्रह्मण्यग्रावस्तुदुन्नेतृभ्यः) -का.श्रौ.सू.-10/2/24 । एवं क्रमेण शतं गवां दक्षिणादानं विधीयते।

- अनुच्छेदः-24
  - प्राणा अवकाशाः। -श.प.ब्रा.-14/1/4/1; कौषी.-8/6
  - स इन्द्र एतमवकाशमपश्यत् तेनासुरानभ्यभवत्। -मैत्रा.-4/1/12
- अनुच्छेदः-25
  - अग्नेऽभ्यावर्त्तिन्नभि मा निवर्तस्वायुषा वर्चसा प्रजया धनेन। सन्या मेधया रय्या पोषेण। -शु.य.सं.-12/7
  - आयुर्नो देहि जीवसे। -शां.गृ.सू.-1/25/7
  - आयुर्मे धेहि आयुर्यजमाने। -आप.श्रौ.सू.-5/1/14
  - आयुः प्राणं प्रजां पशून् कीर्तिम्। -अ.सं.-19/63/1
  - मातृदेवो भव। -तै.उप.-1/11/1
  - न हि माता पुत्रं हिनस्ति न पुत्रो मातरम्। -श.प.ब्रा.-5/2/1/18
  - पत्नीं मा हिंसीः। -आप.श्रौ.सू.-9/2/9

- रक्षाणो अग्ने तनयानि तोका। -ऋ.सं.-10/1/8
- शिशुं रिहन्ति मतयः पनिप्तम्। -ऋ.सं.-9/85/11

- **अनुच्छेदः-26**
  - शिक्षा स्तोतृभ्यो मातिधग्भगो नः। -ऋ.सं.-2/11/21
  - शिक्षा सखिभ्यः पुरुहूत नृभ्यः। -ऋ.सं.-7/27/2
  - शिक्षन्तो नोप शेकिम। -अ.सं.-6/114/2
  - विद्यया देवलोकः देवलोको वै लोकानां श्रेष्ठतमस्तस्माद्विद्यां प्रशंसन्ति। -श.प.ब्रा.-14/4/3/24
  - शिक्षा वस्वो अन्तमस्य। -ऋ.सं.-1/27/5
  - शिक्षाण इन्द्र राय आ। -ऋ.सं.-8/92/9
  - पितुर्न पुत्राः क्रतुं जुषन्त। -ऋ.सं.-1/68/9
  - पितृणां च मन्मभिः। -ऋ.सं.-8/41/2

- **अनुच्छेदः-27**
  - समानं वा सजात्यम्। -ऋ.सं.-8/73/12
  - समानं व्रतं सह चित्तमेषाम्। -अ.सं.-6/64/2
  - समानजन्मा क्रतुरस्ति वः शिवः। -मै.सं.-2/13/10
  - आनन्दो मोदः प्रमोदः। -तै.सं.-3/10/1/1/3
  - आनन्दो ब्रह्मणो विद्वान्। -तै.उप.-2/4/1
  - आत्मा चात्मनि श्रितः, आत्मा हृदये, हृदयं मयि, अहममृते, अमृतं ब्रह्मणि। -तै.ब्रा.-3/10/8/9
  - यत्रावहन्ति कवयः पुरूणि। -मा.श्रौ.सू.-1/7/3/42

- **अनुच्छेदः-28**
  - **यत्रोत मर्त्याय कम्। -ऋ.सं.-4/30/6**
  - **यो यदिच्छति तस्य तत्।-कठोपनि.-1/2/16**
- **अनुच्छेदः-29**
  - **यत्र यन्ति सुकृतो नापि दृष्कृतः। -मै.सं.-1/2/15**
  - **यत्र सुहार्दः सुकृतो मदन्तो। -तै.आ.-9/113/11**
  - **प्राप्यैवं मानुषान् कामान्। -मा.गृ.सू.-2/11/11**
  - **प्रिये धामनि धामनि। -अ.सं.-12/1/52**
  - **प्रियो विशाम् अतिथिर्मानुषीणाम्। -ऋ.सं.-5/1/9**
- **अनुच्छेदः-30**
  - **नैषा पितृन् गच्छति नोत देवान्। -आश्व.ध.सू.-2/7/17/8**
  - **नैनं हिन्वन्त्यपि वाजिनेषु। -ऋ.सं.-10/71/5**
  - **शासेन विशिशासिषद्। -शां.श्रौ.सू.-15/25**
  - **राजा राष्ट्रं विरक्षति। -अ.सं.-11/5/17**
  - **निधिरेष मनुष्याणाम्। -शां.गृ.सू.-1/2/8**

वैदिकवाङ्मये बहूनि साक्ष्यभूतानि सूत्राणि मानवकल्याणसम्बद्धानि यत्र तत्रोपलब्धानि भवन्ति। तेषां समेषामत्र लघुनिबन्धे संयोजनमसम्भवमेवास्ति। तथापि यान्युपयोगीनि सूत्राणि मया प्राप्तानि तान्यत्र प्रस्तुतानि।

उपसंहारः

उपर्युक्तेन साक्ष्येन विवेचनेन चेदं सुस्पष्टं भवति यन्मानवकल्याणाय सर्वविधानि सूत्राणि वैदिकवाङ्मये सन्त्युल्लिखितानि। मानवाधिकारविषयकानि यावन्ति सूत्राणि वेदेषूपनिबद्धानि सन्ति तान्यादाय पृथग्ग्रन्थलेखनं कर्तुं शक्यते। अद्यत्वे आवश्यकमिदमस्ति यदेतेष्वाधुनिकविषयेषु

नित्यनूतनतथ्यानामाविष्कर्तुं बृहत्तमानि शोधकार्याणि स्युः। इतो भिन्नान्यपि मानवकल्याणसम्बद्धानि रहस्यात्मकानि तथ्यान्यादाय विश्वविद्यालयेषु शोधच्छात्राः कार्यं कुर्वन्त्विति।

एतदपि वक्तुमीहे यन्**मानवाधिकारे वैदिकवाङ्मयस्यावदानमि**ति विषयस्थाने **वैदिकवाङ्मये मानवाधिकारसूत्राणि** इत्येषो विषयः समुचितः स्यादिति। यतस्तु वैदिकवाङ्मयस्येदं वैशिष्ट्यमस्ति यत्संसारस्य समस्तमपि वाङ्मयमित एवोपजीवितानि सन्ति। न केवलं सृष्ट्यारम्भादारभ्याद्यपर्यन्तमेवापितु युगयुगान्तराद्वैदिकवाङ्मस्य अविच्छिन्ना धारा प्रवहता सती सर्वलोकोपकारिसिद्धान्तप्रतिपादनमुखेन जगत्कल्याणं सम्पादयति। तदुक्तमपि-

युगान्तेऽन्तर्हितान् वेदान् सेतिहासान् महर्षयः।
लेभिरे तपसा पूर्वमनुज्ञाता स्वयम्भुवा।।[1]

इत्यनया सूक्त्या विस्पष्टं भवति यद्वेदानां समग्रमपि वाङ्मयं तपोनिरतैर्महर्ष्यादिभिः प्रत्यक्षीकृत्य जगत्कल्याणभावनया शिष्योपशिष्यपरम्परया प्रसारितम्। तदुक्तं यास्केन- **साक्षात्कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मेभ्य उनदेशेन मन्त्रान् सम्प्रादुरिति।**[2]

वाङ्मयस्यास्य सकलविश्ववाङ्मयेषु श्रेष्ठत्वमुपपादयता वैदेशिकेन विदुषा मैकडोलनेनोक्तम्- **सर्वेषामपि सनातनानां साहित्यानां मध्ये वैदिकवाङ्मयं मौलिकतामूल्येन सौन्दर्यगुणप्रकर्षणेन च महत्त्वपूर्णपदमवाप। मानवप्रकृतिविकासानुशीलनस्य प्रधानसाधनता तु वेदेषु अन्यवाङ्मयेभ्यो निःसंशयम् उत्कृष्टा एव।** विण्टरट्जिमहोदयेनापि सर्वसंस्कृतिदर्शनयोर्विकासं विज्ञातुमस्याध्ययनं नितरां व्यपेक्षत इति प्रतिपदयता प्रोक्तम्- **यद्यस्माकं स्वसंस्कृतेरुपक्रमप्रक्रमाः बुभत्सिताः, यदि चास्माकं पुराणतमभारोपीयसंस्कृतिः विविदिषिता तदा यत्र भारोपीयजनानां वर्षिष्ठं वाङ्मयं सुरक्षितं तदा भारतवर्षमेव खल्वस्माकं गतिरिति।**

विषयस्य गाम्भीर्यं विलोक्येदमेव वक्तुमुत्सहे यत्-

अनन्तशास्त्रं बहुलाश्च विद्या अल्पश्च कालो बहुविघ्नता च।
यत्सारभूतं तदुपासनीयं हंसो यथा क्षीरमिवाम्बुमध्यात्।।

इत्यलमतिविस्तरेण।

1. ऐतरेयब्राह्मणे सायणभाष्ये उपोद्घाते
2. निरुक्ते- 1/6/20

तत्तद्विशेष्यकबोधे अनुभवानुसारिव्युत्पत्तिबलान्निर्णयः

प्रो. कमलेशमिश्रः

पदसमूहात्मकवाक्याद् वाक्यार्थबोधः शाब्दबोधो वा शब्दाज्जायमानो बोध इति व्युत्पत्तेः। शाब्दबोधे पदविषयकज्ञानस्य करणतया पदजन्यपदार्थस्मरणस्य व्यापारतया शब्दसमूहात्मकवाक्यजन्य-वाक्यार्थबोधस्य फलतया शक्तिज्ञानस्याकाङ्क्षायोग्यतासन्निधिज्ञानस्य च सहकारितया शाब्दबोध जनककारणकलापो नव्यनैयायिकसिद्धान्तसिद्धः।

शाब्दबोधः प्रथमान्तार्थमुख्यविशेष्यक इति आक्षपादाः। 'चैत्रो ग्रामं गच्छति' इत्यत्र ग्रामपदोत्तर-द्वितीयाविभक्त्यर्थाधेयत्वं ग्रामपदार्थस्य निरूपितत्वसम्बन्धेनान्वयः, ग्रामनिरूपिताधेयत्वस्य संयोगावच्छिन्न-व्यापाररूपधात्वर्थस्यैकदेशे संयोगे स्वरूप-सम्बन्धेनान्वयः। ग्रामनिरूपिताधेयत्वविशिष्टसंयोगावच्छिन्न-व्यापारस्याख्यातार्थकृतौ अनुकूलतासम्बन्धेनान्वयः। कालं बोधयत आख्यातस्य संख्याशक्तत्वे विवादः। अत एवोक्तं शब्दशक्तिप्रकाशिकायां जगदीशतर्कालङ्कारेण ''यद्याख्यातमात्रस्य तदेकवचनस्य वा न संख्यशक्तत्वे प्रमाणं तदान्यथा निर्वक्ति'' इति। तथा च ग्रामनिरूपिताधेयत्वविशिष्टसंयोगावच्छिन्न-क्रियानुकूलवर्त्तमानकृत्याश्रय एकत्वविशिष्टश्चैत्र इति शाब्दबोधः। अत्र प्रथमान्तार्थमुख्य-विशेष्यकशाब्दबोधः स्पष्टतां परैति। शाब्दबोधो धात्वर्थमुख्यविशेष्यक इति वैयाकरणाः, ''भावप्रधान-माख्यातम्'' इति यास्कमुनिवचनस्य ''भावो धात्वर्थः'' प्रधानं विशेष्यो यस्याख्यातस्येति बहुव्रीहिसमाश्रयात्। न्यायमतेन नात्र बहुव्रीहिः, किन्तु षष्ठीतत्पुरुषः ''भावस्य प्रधानम्'' इति व्युत्पत्तेर्न्यायसम्मतत्वात्।

'चैत्रो ग्रामं गच्छति' इत्यत्राख्यातार्थः कर्त्ता। ग्राममित्यत्र द्वितीयार्थः कर्म। द्वितीयार्थकर्मणि ग्रामपदार्थस्याभेदेनान्वयः। प्रथमार्थचैत्रस्याख्यातार्थकर्त्तरि विशेषणताऽभेदसम्बन्धेन। तथा च चैत्रकर्त्तृक ग्रामाभिन्नकर्मकगमनमिति शाब्दबोधः। अत्र धात्वर्थमुख्यविशेष्यकबोधः।

मुख्यविशेष्यत्वं नाम इतराविशेषणत्वे सति विशेष्यत्वम्। अथवा प्रकारतानवच्छिन्ना विशेष्यता। ''पर्वतो वह्निमान्'' इति ज्ञाने वह्नौ वह्नित्वनिरूपित-विशेष्यतायाः पर्वतनिरूपितप्रकारतायाश्च सत्त्वादियं विशेष्यता न मुख्यविशेष्यता प्रकारतायाः समानाधिकरणत्वेन तस्य उपगमात्। किन्तु पर्वतनिष्ठविशेष्यता मुख्यविशेष्यता प्रकारताया असमानाधिकरणत्वेन तद्ग्रहणात्।

शशी दिवसधूसरो विगतयौवना कामिनी
सरो विगतवारिजं मुखमनक्षरं स्वाकृतेः।
प्रभुर्धनपरायणः सततदुर्गतः सज्जनः
नृपाङ्गणगतः खलो मनसि सप्त शल्यानि मे॥

इत्यादौ तिङन्तविरहितप्रयोगेऽपि प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधो निरपवादः।

ननु ''पश्य मृगो धावति'' इत्यत्र ''मृगकर्त्तृकधावनकर्मकं दर्शनम्'' इति बोधो नैयायिकैरपि कथं व्याकरणरीत्या व्याकरणरीत्या स्वीक्रियत इति चेन्न, सर्वत्र प्रथमान्तार्थमुख्यविशेष्यक एव बोध इति अनुभावाभावात्। वस्तुतः सति सम्भवे प्रथमान्तार्थमुख्यविशेष्यकबोध इति न्यायसिद्धान्तः। ''अत एव यत्र विशेष्यवाचकसमानविभक्तिकपदं निपातपदं वा नास्ति, तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावादसौ मुख्यविशेष्यतयैव भासते'' इति व्युत्पत्तिवादकारवचनप्रामाण्यान्नः प्रतीतिः।

'नीलो घटः' इत्यत्र विशेष्यकवाचकसमानविभक्तिकपदान्तरनीलपदस्य सत्त्वाद् घटो विशेष्यतया, 'चन्द्र इव मुखम्' इत्यत्र इवेति निपातस्य सादृश्यार्थकस्य चन्द्रप्रति-योगिकसादृश्यविशेष्यतया चन्द्रविशेष्यतया वा मुखञ्च भासेते। किन्तु 'चैत्रः' इति वाक्ये चैत्रस्य विशेष्यत्वसम्पादनाय न किमपि समानविभक्तिकपदान्तरं न वा किमपि निपातपदम्। अत्र 'एकत्ववान् चैत्र' इति बोधात् प्रथमान्तार्थस्य चैत्रस्य मुख्यविशेष्यता।

सति सम्भवे इति शंसनाच्च ''पचति'' इत्यतः ''पाकानुकूला कृतिः'' इति कृतिमुख्यविशेष्यकस्य ''चैत्रेण सुप्यते'' इत्यादौ ''चैत्रकर्तृकः स्वापः'' इति धात्वर्थमुख्यविशेष्यकस्य च बोधस्य नैयायिकैरङ्गीकारात् क्वचित् प्रथमान्तार्थस्य मुख्यविशेष्यत्वाभावेऽपि न हानिरिति अवगम्यते।

व्युत्पत्तिवादग्रन्थस्य गूढार्थतत्त्वालोके ''न हि प्रथमान्तार्थमात्रस्य मुख्यविशेष्यत्वं कैश्चिदपि नैयायिकदेशीयैरपि प्रतिज्ञातम्। नञ्समभिव्याहारस्थले विशेषणविभक्तिस्थले च तदनभ्युपगमात्, तद्भङ्गमात्रफलकस्य उक्तस्थलान्वेषणक्लेशस्य विफलतैव'' इति बच्चाझामहाशयानां व्याख्यानादपि प्रथमान्तार्थमात्रस्य मुख्यविशेष्यत्वं न सिद्ध्यतीत्यर्थः प्रतीयतै।

वैयाकरणैरपि ''आनय अश्वो गच्छति'' इत्यादौ अश्वकर्त्तृकगमनस्यानयन-क्रियायामन्वया-योग्यतया बाधात् गमनकर्त्रश्वस्यैवानयनक्रियायामन्वयः स्वीकर्त्तव्यः। तेन च प्रथमान्तार्थमुख्यविशेष्यकशाब्दबोधः सिद्धः। ''शृणु कोकिल कूजति'' इत्यादौ नैयायिकानामपि अगतिः।

अतस्तत्तद्विशेष्यकबोधेऽनुभवानुसारिव्युत्पत्तिबलान्निर्णय इति मतिः।

सर्वं नामधातुजमाहेतिविचारपुरस्सरं धात्वर्थविमर्शः

डॉ. रामनारायणद्विवेदी

अर्थसमाप्तौ समर्थे पदसमूहात्मकवाक्ये नियतोपस्थितस्य धातोरर्थविषये वैयाकरणमीमांस–कनैयायिकेषु प्रवर्तते कश्चिद् विसंवादः। तेन शाब्दबोधप्रक्रियायां किञ्चिद् वैषम्यमागतं दृश्यते। अत एवाऽत्र प्रबन्धे तत्तद्दार्शनिकमतोपन्यासपुरस्सरं किञ्चिद् गौरवलाघवफलोपकल्पितां समीक्षामाश्रयता **नागेशभट्ट**मतावलम्बने समादरो विहितः। अत्र विषये प्राचीनाः वैयाकरणा अपि न साधीयसीं सरणिं स्वीकुर्वन्ति इति सोदाहरणमिह विवेच्यते।

''प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि[1] '' इति **गौतम**सूत्रप्रमाणेषु वैयाकरणैः प्रधानतया शब्दस्य प्रामाण्यमुररीक्रियते। तदुक्तं **महाभाष्ये** –

''शब्दप्रमाणका वयम्, यच्छब्द आह तदस्माकं प्रमाणम्[2]।''

तत्र –

''नामान्याख्यातजानीति[3] शाकटायनो नैरुक्तसमयश्च, न सर्वाणीति गार्ग्यो वैयाकरणानां चैके।।''

इति निरुक्तवचनात्,

''नाम च धातुजमाह निरुक्ते, व्याकरणे शकटस्य च तोकम्[4]"।।

इति **महाभाष्य**वचनाच्चोणादिं परित्यज्य सर्वेषामपि शब्दानां धातुप्रत्ययनिष्पन्नत्वाद् को नाम धात्वर्थ इति जिज्ञासा कस्य हृदयाम्बुजे नोदेति।

तत्र दार्शनिकेषु पर्याप्तं वैमत्यमवलोक्यते धात्वर्थविषये। वैयाकरणानां मतद्वयं वर्तते। तत्र प्रचीनाः वैयाकरणाः धातोः पृथक् शक्तिं स्वीकुर्वन्ति। तदुक्तं वैयाकरणभूषणसारस्याऽऽरम्भे **कौण्डभट्टेन**–

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम्[5]।।

---

1. गौतमन्यायसूत्रम्, 1.1.13
2. पतञ्जलिः – व्याकरणमहाभाष्यम्, 1.1.1
3. यास्कनिरुक्तम् , 1.4.1
4. पतञ्जलिः – व्याकरणमहाभाष्यम् 3.3.1
5. कौण्डभट्टः – वैयाकरणभूषणसारः, धात्वर्थप्रकरणम् 2

अत्रेदं तत्त्वम् – "फलानुकूलो यत्नसहितो व्यापारो धात्वर्थः। फलत्वञ्च तद्धात्वर्थजन्यत्वे सति कर्तृप्रत्ययसमभिव्याहारे तद्धात्वर्थनिष्ठविशेष्यतानिरूपितप्रकारतावत्त्वम्। विभागजन्यसंयोगादिरूपे पतत्यादिधात्वर्थे विभागसंयोगयोर्विभागस्य फलत्ववारणाय सत्यन्तोपादानम्"[1]। संयोगे तद्वारणाय प्रकारतावत्वम्। तेन 'वृक्षात् पर्णं भूमौ पततीत्यादौ' विभागाश्रयस्य वृक्षादेः संयोगाश्रयस्य भूम्यादेश्च न कर्मत्वम्। कर्मप्रत्ययसमभिव्याहारे तु फलस्य विशेष्यता। व्यापारत्वं च पदान्तरसमभि-व्याहाराप्रयोज्यसाध्यत्वप्रकारकाभिधानविषयत्वम्।

अथवा तद्धात्वर्थफलजनकत्वे सति तद्धातुवाच्यत्वं व्यापारत्वम्, अनुकूलत्वमत्र संसर्गः। अनुकूलत्वं च – फलनिष्ठजन्यतानिरूपितजनकत्वम्। ''भावप्रधानमाख्यातम्, सत्त्वप्रधानानि नामानि'' इति निरूक्तोक्तव्यापारमुख्यविशेष्यकः शाब्दबोधो भवति। तत्र तिङ्वाच्यं संख्याविशिष्टं कारकं, कालश्च व्यापारे विशेषणम्।

तथा च – क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकधर्मवत्वं हि साध्यत्वम्। सिद्धत्वं च – क्रियान्तराकाङ्क्षोत्थापकतावच्छेदकवैजात्यवत्वे सति कारकत्वेन क्रियान्वयित्वे सति कारकान्वयायोग्यत्वम्। साध्यत्वस्यासत्त्वभूतत्वमित्यपरपर्यायः। तदुक्तं **वाक्यपदीये** द्वितीयकाण्डे –

''सत्त्वस्वभावमापन्ना व्यक्तिर्नामभिरुच्यते।
असत्त्वभूतो भावश्च तिङ्पदैरभिधीयते[2]॥''

साध्यत्वेन प्रतीयमानस्य व्यापारस्य फूत्कारत्वाधःसन्तापनत्वयत्नत्वादितत्तद्रूपेण वाच्यत्वेऽपि न नानार्थतापत्तिः। नानार्थत्वं च अननुगतनानाधर्मावच्छिन्नशक्तिनिरूपकतावच्छेदकैकधर्मवत्त्वम्। तदादिन्यायेन बुद्धिविशेषादेः शक्यतावच्छेदकानामननुगमकस्य सत्वाद्दोषाभावः। आख्यातक्रियैकत्वव्यवस्थाऽपि संकलनरूपबुद्धिविशेषात्मकावच्छेदकैक्यस्वीकारेणैव निर्वहति। तदुक्तं **वाक्यपदीये** –

''गुणभूतैरवयवैः समूहः क्रमजन्मनाम्।
बुद्ध्या प्रकल्पिताभेदः क्रियेति व्यपदिश्यते[3]॥''

''कर्तरि कृत्[4]'' इत्यत एव कर्तृग्रहणस्य ''लः कर्मणि च भावे चाऽकर्मकेभ्यः[5] '' इत्यत्रानुवृत्या तिङ्कृतोर्वैषम्यस्य दुरुपपादत्वात् फलमेव धात्वर्थो, भावना तु वाच्यैव न तद्विषयकशाब्दबोधस्य सर्वत्राननुभवात्। किन्तु लिङैव परं सा आख्यातवाच्येति **भास्कर**मतानुयायिमतं न स्वीकर्तव्यम्।

नागेशभट्टप्रभृतयो नवीनाः वैयाकरणाः फलविशिष्टे व्यापारे व्यापारविशिष्टे फले च क्रमशः कर्तृप्रत्ययस्थले कर्मप्रत्ययस्थले च शक्तिं स्वीकुर्वन्ति। फलव्यापारयोर्धातोः पृथक् शक्तावुद्देश्यविधेयभावेनान्वयापत्तिस्तयोः स्यात्, पृथगुपस्थितयोस्तथान्वयस्यौत्सर्गिकत्वात्। एवं च

1. वै.सि.परमलघुमञ्जूषा – धात्वर्थप्रकरणम्।
2. भर्तृहरिः – वाक्यपदीयम् 2.195
3. तदेव, 3.क्रियासमुद्देशः 49 पाणिनिः – अष्टाध्यायी, 3.4.67
4. तदेव, 3.4.69
5. तदेव, 3.4.69

फलव्यापारयोर्भिन्नशक्तिस्वीकर्तॄणां प्राचीनानां वैयाकरणानाम्मते एकपदे व्युत्पत्तिद्वयकल्पने फलविशेषणकव्यापारबोधः कर्तृप्रत्ययसमभिव्याहृतधातुजन्योपस्थितिः कारणम् - इति कार्यकारणभावद्वयशक्तिकल्पने, धातोर्बोधजनकत्वसम्बन्धद्वयकल्पने चातिगौरवात् फलावच्छिन्ने व्यापारे व्यापारावच्छिन्ने फले च धातूनां शक्तिः, कर्तृप्रत्ययसमभिव्याहारश्च तत्तद्बोधनियामक इति नागेशमतमेव स्वीकर्तव्यम्।

यत्तु **मीमांसकाः** - फलमात्रं धात्वर्थः, व्यापारश्च प्रत्ययार्थ इति वदन्ति, बहूनां धातूनां तत्र शक्तिकल्पनापेक्षयाल्पानां प्रत्ययानां तत्कल्पने लाघवात्। तन्न समीचीनम्, ''लः कर्मणि....[1]'' इत्यादिसूत्रविरोधापत्तेः। नहि तेन व्यापारस्य प्रत्ययार्थता लभ्यते। किञ्च -'पचति, पक्ष्यति, पक्ववान्' इत्यादिस्थलेषु फूत्कारादिप्रतीतये तत्रानेकप्रत्ययानां शक्तिकल्पनापेक्षयैकस्य धातोरेव शक्तिकल्पनोचिता। फूत्कारादेः प्रत्ययार्थत्वे सति गच्छतीत्यादिस्थलेषु फूत्कारादेः प्रतीतिवारणाय तद्बोधः पचिसमभिव्याहारस्यापि कारणत्वकल्पनेऽतिगौरवमापद्यते। किञ्च सकर्मकाकर्मकव्यवहारोच्छेदापत्तिश्च। यद्यपि पचतीत्यत्र पाकानुकूलव्यापारवतः कर्तुरपि विवरणविषयत्वमस्ति, तथापि पचतीत्यत्र कर्तुर्विवरणं पचतीत्यस्य पाकं करोतीति शब्दार्थकर्मत्त्वविवरणवत् तात्पर्यार्थविवरणं न तदर्थनिर्णायकम्।

फलस्य धातुना तदाश्रयस्य चाक्षेपेणैव लाभसम्भवेन ''लः कर्मणि...[2]'' इति वैयर्थ्यापत्तेः। कर्मकर्तृकृतां कारकभावनोभयवाचकत्वे गौरवाच्च। भावविहितघञादीनां व्यापारवाचकत्वे ग्रामो गमनवानित्याद्यापत्तिः, तद्वाचकत्वे तेनापि स्वाश्रयाक्षेपे कर्तुरभिधानापत्तिः। किञ्च ''गुरूः शिष्याभ्यां पाचयति'' इत्यादिस्थलेषु ''हेतुमति च[3]'' इति सूत्रबलात् प्रयोजकव्यापारस्य णिजर्थत्वे प्रयोज्यव्यापारः आख्यातार्थो वाच्यः, संख्यायाः स्ववाचकाख्यातार्थव्यापारेऽन्वयिन्येवान्वयाच्छिष्याभ्यामिति द्विवचनानापत्तिः, पाचयतीत्येकवचनानापतिश्च तिङ्गुरोरनभिधानेन तत्र प्रथमाया अनापत्तेः शिष्यशब्दात्तदापत्तेश्च। **मीमांसकमते** चैत्रः पचतीत्यत्र चैत्रभिन्नैककर्तृकी वर्तमानकालिकी विक्लित्त्यनुकूला भावनेत्याकारकः शाब्दबोधो भवति।

नैयायिकाः फलव्यापारौ धात्वर्थौ इति स्वीकुर्वन्ति। ते लकाराणां लाघवात् कृतावेव शक्तिं स्वीकृत्य कृतिमतः कर्तृत्वेन तत्र शक्तौ गौरवात् प्रथमान्तपदेनैव तल्लाभः आख्यातार्थे धात्वर्थो विशेषणम्। प्रकृत्यर्थप्रत्ययार्थयोः सहार्थत्वे प्रत्ययार्थस्यैव प्राधान्यात् प्रथमान्तार्थे आख्यातार्थो विशेषणम् अनुकूलत्वमाश्रयत्वं चात्र संसर्गः। तथा च चैत्रः पचतीत्यादौ विक्लित्या- नुकूलव्यापारानुकूलकृतिमांश्चैत्रः इत्याकारकः प्रथमान्तार्थमुख्यविशेष्यकः शाब्दबोधो भवति। ''रथो गच्छतीत्यादौ रथस्याचेतनत्वाद् यत्नशून्यत्वेन व्यापारे आश्रयत्वे वा आख्यातस्य लक्षणत्वमित्याहुर्नैयायिकाः।

वैयाकरणमते उपर्युक्तं समीचीनं न प्रतिभाति, युष्मदस्मदोर्लकारेण सामानाधिकरण्याभावात् पुरुषव्यवस्थानापत्तेः। ''पचन्तं चैत्रं पश्य, पचते देवदत्ताय देहीत्यादौ शतृशानजादीनामपि

1. तदेव, 3.4.69
2. पाणिनिः - अष्टाधयायी, 3.4.69
3. पाणिनिः - अष्टाध्यायी

तिबादिवल्लादेशाविशेषेण तेभ्यः कृतिमात्रबोधापत्तेश्च। न चेष्टापत्तिः आश्रयाश्रयिभावेन कर्मणि सम्प्रदाने च कृतेरन्वयादिति वाच्यम्, नामार्थयोरभेदान्वयोऽव्युत्पन्न इति व्युत्पत्तिभंगापत्तेः।

नैयायिकानां मते तु – " पश्य मृगो धावती"त्यत्र अन्यदेशसंयोगानुकूलकृतिमन्मृगकर्मकं प्ररेणाविषयीभूतं यद्दर्शनं तदनुकूलकृतिमांस्त्वमिति बोधो जायते। तत्र विशेष्यभूतार्थवाचकस्य मृगशब्दस्य प्रातिपदिकसंज्ञायां दृशिक्रियायाः कर्मत्वाद् द्वितीयायां धावन्तं मृगं पश्येतिवत् पश्य मृगं धावतीत्यापत्तिः स्यात्। अप्रथमासमानाधिकरणे लटः स्थाने शतृशानचोर्नित्यतया विधानेन एवंप्रकारकप्रयोगाणां विलयापत्तेः।

वैयाकरणमते "पश्य मृगो धावति" इत्यत्र मृगकर्तृकधावनकर्मकं प्रेरणाविषयीभूतं त्वत्कर्तृकं दर्शनमिति शाब्दबोधो जायते। अत्र मृगकर्तृकं यद् धावनं तत्र दृशिक्रियाया एव प्राधान्यम्। तत्र विशेष्यभूतं यद्दर्शनं तद्रूपार्थवाचकस्य धावतीत्यस्य धातुपर्युदासबलात् प्रातिपदिकसंज्ञाया अप्राप्त्या द्वितीया न भवति। कर्मत्वन्तु संसर्गमर्यादया भासते।

पुनश्च **तार्किकाः**– विशिष्टार्थवाचकं यद् "धावति मृगः" इति वाक्यमस्ति तस्य कर्मसंज्ञायामपि समासग्रहणकृतनियमानुसारेण प्रातिपदिकसंज्ञा न प्राप्नोति तथा मृगपदस्य प्रातिपदिकसंज्ञायामपि कर्मसंज्ञाभावान्न द्वितीया, तथापि न काचित् क्षतिरित्याहुः।

परन्तु नैयायिकानामुपर्युक्तं मतं न समीचीनमित्याहुर्वैयाकरणाः। 'अनभिहिते' इत्यधिकारसूत्रप्रकरणे अभिधानञ्च तिङ्कृत्तद्धितसमासैरित्येतत्परिगणनप्रत्याख्यानपरभाष्यरीत्या द्वितीयापत्तेः।

कौण्डभट्टप्रभृतीनां प्राचीनानां वैयाकरणानां मते 'देवदत्तो जानाति, देवदत्त इच्छति' इत्यादौ देवदत्ताभिन्नाश्रयको ज्ञानानुकूलो वर्तमानकालिको व्यापारः, देवदत्ताभिन्नाश्रयक इच्छानुकूलो व्यापार इत्याकारकः शाब्दबोधो जायते।

परन्तु **नागेशभट्ट**प्रभृतीनां नव्यवैयाकरणानां मते जानातीत्यत्र विषयतया ज्ञानं फलम्, आत्ममनः संयोगो व्यापारः। अत एव मनो जानातीत्युपपद्यते। आत्मा एवान्तःकरणम्। मनोऽपि तद्वृत्तिविशेषरूपम्। आत्मा आत्मानं जानातीत्यादावन्तःकरणावच्छिन्नः कर्ता शरीरावच्छिन्नं कर्मेति "कर्मवत्....[1]" सूत्रे भाष्ये स्पष्टम्। अत एव तेषां मते देवदत्तो जानातीत्यत्र "यत्किञ्चिन्निष्ठविषयतानिरूपकज्ञानानुकूलो देवदत्ताभिन्नैकाश्रयवृत्तिवर्तमानकालिको व्यापारः" इत्याकारकः शाब्दबोधो भवति। इच्छतेरिच्छानुकूलं ज्ञानमर्थः। अतीतानागतयोरपि बुद्ध्युपारोहात् फलशालित्वम्। अत एव देवदत्तः इच्छतीत्यत्र नागेशमते यत् किञ्चिन्निष्ठविषयतानिरूपकेच्छानुकूलो देवदत्तभिन्नैकाश्रयवृत्तिवर्तमानकालिको व्यापारः – इत्याकारकः शाब्दबोध इत्यलमतिविस्तरेण। तदुक्तम्–

"यत् किञ्चिद् वाङ्मयं लोके दृश्यते जगतीतले।
तत् सर्वं धातुभिर्व्याप्तं शरीरमिव धातुभिः॥" इति शम्॥

सैरन्ध्रीनाटके प्रतिबिम्बिता द्रौपदी : नार्या आहतस्वाभिमानस्य प्रथमः संघर्षः

डॉ. सुमनकुमारझा

आदिकाव्यवाल्मीकिरामायणादारभ्य साम्प्रतं यावद्विरचितमतिविशालमगाधं सुविस्तृतञ्च खलु संस्कृतसाहित्यम्। तत्रैकतो महनीयमनुपमं प्रकर्षभूतं प्राचीनसंस्कृतसाहित्यं स्ववैशिष्ट्येन जगत्यस्मिन् नितरां राराजते त्वपरतो युगानुकूलं विरचितमर्वाचीनसंस्कृतसाहित्यम्। सम्प्रति संस्कृतभाषायां नानाविध ानि काव्यानि आधुनिकैः कविभिः प्रभूतरूपेण विरच्यन्ते। तेषु महाकाव्य-गद्यकाव्य-खण्डकाव्य-मुक्तक-चम्पू-रूपकोपरूपक-कथा-स्तोत्रप्रभृतीनि काव्यानि सुतरां श्लाघन्ते। **'सन्दर्भेषु दशरूपकं श्रेयः'** इत्यालङ्कारिकवचनेन काव्येषु दशरूपकं विशिष्टमिति। तत्रापि नाटकस्य रमणीयता सर्वथा प्रशस्या एव।

अर्वाचीनसंस्कृतसाहित्ये नैकानि नाटकानि प्रथितानि सन्ति। तेषु नाटकेषु गोस्वामिबलभद्रप्रसादशास्त्रिप्रणीतं सैरन्ध्रीनाटकं नूनमेव विलक्षणं प्रतिभाति। नाटकस्यास्याधिकारिकं कथावस्तु महाभारताख्यात् प्रसिद्धगौरवग्रन्थात् संगृहीतमित्यलङ्कारशास्त्रग्रन्थेषु प्रदत्तं नाटकलक्षणानुकूलमितिहासप्रसिद्धं ख्यातवृत्तमेव।

पाण्डवानामेकवर्षस्याज्ञातवासे विराटनगरे विराटराजमहिष्याः सुदेष्णाया परिचारिकायाः सैरन्ध्र्या आहतस्वाभिमानस्य संघर्षो नाटकेऽस्मिन् चित्रितो नाटककारेण। सुविदितमेव विदुषां भारतीयसाहित्यसुपरिचितानां महाभारतकथापिपासुनां यत् द्रौपदी एव छद्मनाम्नी सैरन्ध्री, या अज्ञातवासे सैरन्ध्रीरूपेण प्रच्छन्नतया विराटराज्ये दासीभावं स्वीकृत्य अध्यतिष्ठत्। सैरन्ध्री, दासी-द्रौपदी सैव द्रौपदी या पाञ्चालनरेशस्य यज्ञानलज्वालाभ्यः समुत्पन्ना दुहितासीत्। या राजप्रासादे वैभवैर्वर्धिता सुखेन पालिता स्वयंवरे मीनाक्षिवेधं विधाय मध्यमपाण्डवेनार्जुनेन परिणीतापि नियतिवशात् पञ्चपाण्डवानां भार्या सञ्जाता। सैव द्रौपदी यां युधिष्ठिरो राजसम्पदादिभिः सह द्यूते पराजयत। दुर्दैववशात् दुःशासनः केशेषु गृहीत्वा यामेकवस्त्रां तथाभूतां बलात् कर्षन् राजसभामानीय गुरुजनानां सन्मुखे वस्त्रमाकृष्यार्धनग्नां व्यधात्। तत्रस्था वृद्धाः, वीराः, विवेकिनो भीष्मद्रोणकृपाचार्यप्रभृतयोऽपि नारीजातेरेतद् घोरापमानं लज्जास्पदं दृश्यं मौनीभूयापश्यन्।

अनेनैव घोरापमानहविष्येण यज्ञानलसम्भवाया याज्ञसेन्या हृदये समुत्पन्नोऽभूदाक्रोशः। तस्याक्रोशस्य संघर्षमयी प्रतिशोधज्वाला, या द्वादशवर्षीयवनवासकालावसानेऽपि नैव शान्ताऽभूत्। कौरवकुल-

विनाशायोन्मुक्तकेशाया: प्रतिशोधाग्निना दंदह्यमानाया अपि द्वादशवर्षवनप्रवासभ्रमणपरवशाया:, वर्षैकमज्ञातवासविभीषिकायां विराटराजमहिष्या: सुदेष्णाया: सैरन्ध्रीदासीभूय पदे पदेऽपमानिताया विपत्काले स्वलज्जासम्मानरक्षार्थं संघर्षरताया द्रुपदसुताया: पाञ्चाल्या: प्रतिपदं मर्मान्तिकामन्तर्द्वन्द्वमयीमज्ञातवासकालस्य जीवनव्यथाकथापमानमधिकृत्य नवभिरङ्कै: सुविहितकथावस्तुविन्यासं मनोरमभिनवं पुरुषाणामत्याचारविरोधे प्रथमं नारीसंघर्षचरितात्मकं सैरन्ध्रीनाटकं सुतरां श्लाघतेऽर्वाचीनसंस्कृतसाहित्ये ।

वस्तुतो महाभारतकथाविकासप्रसङ्गे द्रौपद्या व्यथा कथा च सभ्यान् विचिन्तयितुं विचारयितुं च विवशीकरोति। कौरवपाण्डवयो: साम्राज्यप्राप्तिक्रमे द्रौपद्या साकं या या घटना घटिता:, ता नूनमेव नार्या: स्वाभिमानं मानमस्तित्वञ्च कवलीकुर्वन्ति। कौरवपाण्डवयोराधिपत्यस्थापनाय प्रवर्तितेऽस्मिन्महासंग्रामे को वा दोष: पाञ्चाल्या:? किमर्थं तया साकं तादृशो व्यवहार: प्रवर्तित इत्यादय: प्रश्ना अद्याप्यनुत्तरिता: सन्ति। किं नार्या: पृथक् सत्त्वं न भवति परिवारे समाजे राज्ये राष्ट्रे वा? किं सर्वदा नार्या: अभिज्ञानं पुत्रीत्वेन भगिनीरूपेण भार्यात्वेन मातृरूपेणेवोचितम् ? किं नार्या: प्राणिमात्रत्वेनाभिज्ञानं न भवेत्? यदि भवेत्तर्हि किमर्थं न तदानीन्तन: समाजो लोको वा पृष्टवान् याज्ञसेनीं यत्ते मनसि किं प्रचलति? को वा तव विचारोऽत्र? किं तदानीन्तनस्य लोकस्येदं दायित्वं नासीत् यल्लोको द्रौपद्या सह जायमानेषु व्यवहारेषु विरोधं कुर्यादिति। प्रश्नस्यास्योत्तरमन्वेष्टुं शक्यते नाटकेऽस्मिन्। यदस्माभिर्विचार्यते कदाचिद् स एव प्रश्नो नाटककारस्यापि मनसि आसीत्, यस्य प्रतिफलनमत्र परिलक्ष्यते।

नाटकस्यास्य प्रारम्भोऽपि प्रतिशोधज्वालायां प्रज्वलन्त्यास्तस्या एव पाञ्चाल्या आक्रोशवाक्यैरेव सम्पद्यते। वनवासस्यान्तिमो वर्षोऽज्ञातरूपेण निर्वहणीय आसीत् पाण्डवानामन्यथा भूयोऽपि तादृश एव वनवास: सोढव्य इति समयो निर्धारित:। कीदृश आसीदात्मपीडाकर: कालोऽयम्। यस्मिन् पाण्डवा गुप्तरूपेण क्षुद्रकर्मचारिणो भूत्वा विराटराजगृहे न्यवसन्। पाञ्चाली या स्वयं पट्टमहिषी आसीत्, सा विराटराजमहिष्या: सुदेष्णाया: परिचारिकारूपेण कालं यापयांचकार ।

तत्रापि राजश्यालको दुराचारी कीचक: तां प्रत्यासक्तो बभूव । दुर्जनोऽसौ कीचक: तया साकं वारं-वारं दुर्व्यवहारं प्रदर्शितवान्। राजसभायां तामुपरि मिथ्यारोपमपि प्रक्षिप्तवान्। अपमानैरपमानिताऽपि सा अनाचारेण सह विरोधं न तत्याज, अपितु भूयो नव्यसंघर्षाय समुद्यताऽभूत् सैरन्ध्री। भीषणसंघर्षेऽसह्यरूपेण पीडिता सा तं दुराचारिणं कीचकं धैर्येण बुद्ध्या नीत्या च कालग्रासं व्यधात्। अत्रापि सैरन्ध्र्या: स्वाभिमानसंरक्षणाय महान् संघर्षो दृश्यते। राजसभायामथ च सम्पूर्णे राज्ये लोके च नारीं प्रति कृतापमानस्य दुराचारस्य च विरोधे प्रतिपदं तस्या: संघर्ष: सर्वथा प्रशंसनीयोऽनुकरणीयश्च विद्यतेऽस्माकं कृते। यद्यपि सत्यमिदं वचनं यत् दुर्जन: स्वपापेन कृत्येनेव विनश्यते तथापि दुराचारिणां वधोऽनिवार्य एव। यथा चोच्यते महाकविमाघेन- 'निपातनीया हि सतामसाधव:।'

वस्तुतोऽनेन नाटकेन कविना य: संदेश: समाजाय प्रदत्त:, स सर्वथा श्लाघनीयो यत: कीचकसदृशानां दुराचारिणां चरित्रं वर्तमानयुगेऽपि प्रासङ्गिकं प्रतीयते। अधुना तु समाजे राज्ये राष्ट्रे च

तादृशा नैके दुराचारिणो विद्यमानाः सन्ति, एतादृशेभ्योऽपि काचित् सैरन्ध्री नूनमेव अपेक्षिता, तेषां विनाशाय। यथा च कथयति नाटककारो गोस्वामिबलभद्रप्रसादशास्त्री- 'यतस्तस्य दुराचारिणश्चरित्रं' वर्तमानयुगेऽपि प्रासंगिकं प्रतीयते। पश्येदानीं चापि समाजे-

बालकवृद्धनिरीहजनानां प्रवहति नित्यं रक्तम्।
अबलानामपहरणैर्भव्यैर्भोगैर्विलसति नक्तम्।।
पदप्रतिष्ठा शासनसत्तासिद्धिर्बाहुबलेन।
छद्मवञ्चना हिंसासक्तिः प्रीतिश्चापि छलेन।।[1]

किं बहुना- **दिवसे हरति भूषणं कण्ठादबलानां निःशङ्कः।**
रात्रौ लुण्ठति हन्ति निरीहान्, दस्युगणः सातङ्कः।।[2]

वस्तुतो लोकेऽस्मिन् अधुनाऽपि अराजकता दृश्यते विशेषतो नारीभिः सह। सम्प्रत्यपि ताभिः सह प्रतिदिनं हत्या-बलात्कार-शारीरिकप्रतारणामानसिकप्रतारणा-यौनशोषण-दहेज- हत्याप्रभृतयो नैका घटना घटन्ते। सम्प्रति देशे घटिता निर्भयाघटना तथ्यस्यास्य प्रमाणम्। प्रतीयते यत् सैरन्ध्रीप्रादुर्भूतो नार्याः स्वाभिमानरक्षणसंघर्षोऽधुनाऽपि प्रचलितो दरीदृश्यते। नाटकस्यास्य प्रमुखं पात्रमस्ति सैरन्ध्री, या तत्र दासीरूपेण चित्रिता विद्यते। नाटकस्य प्रस्तावनायामेव तस्या रङ्गमञ्चे प्रवेशो जायते।

तद्यथा-

अहो महीयान् ऋतुराज एष, यस्मिन् धरालङ्कुरुते स्वरूपम्।
परं दुरन्तप्रकृतिः खलानां, रक्तेन तां रञ्जयितुं प्रवृत्ता।।[3]

अत्र **'परं दुरन्तप्रकृतिः खलानां रक्तेन तां रञ्जयितुं प्रवृत्ता'** इत्यर्धसूत्रधारवाक्यमादाय द्रौपद्याः प्रवेशो भवति।

इत्थं कौरवसभापमानेन वनवासदुर्दिनदुःखेन पीडिताया द्रौपद्या आक्रोशः प्रथमाङ्क एव प्रस्फुटितो भवति। तत्र च कथयति द्रौपदी- **अहं चापि किं करोमि, मदीयान्तःकरणेऽपि घोरापमानप्रतिशोध ानलो नितरां दंदह्यमानोऽद्यापि नैव शाम्यति।** तथाहि-

एकान्तशान्तमिदमात्मरतिप्रधाानं संसेव्य भोगविरताश्रममप्यरण्यम्।
घोरापमानहविषा ज्वलितः सभायां नाद्यापि शाम्यति हृदि प्रतिशोधवह्निः।।[4]

---

1. सैरन्ध्रीनाटकम्-प्रथमोऽङ्कः, श्लो.सं.-5,6
2. तत्रैव-1/7
3. तत्रैव-1-1
4. तत्रैव-1-17

नाटके द्रौपद्या आक्रोशः पाण्डवान् प्रत्यपि पदे-पदे संलक्ष्यते। यथा-

पाण्डवार्निर्वीयास्तपस्विनो जाताः। हा दुर्दैव! कीदृशी ते निष्ठुरता पदे पदेऽपमानिताऽग्निसंभवाऽसौ पाञ्चाली पाण्डुकुलवधूरद्य वने भ्रमन्ती स्थण्डिले श्याना कम्वाक्रोशेत्। तत्र स्वपितरं सम्बोधयन्ती कथयति सा-

अहो तात! क्षमस्व मामिमां दुर्दशापन्नाम्, स्वपुत्रीम्। यतो यज्ञानुष्ठानाग्निशिखार्चिषां मध्यादुत्पन्ना ज्योतिष्मतीयं ते पुत्री येषां हस्ते त्वया प्रदत्ता, कदर्यास्ते तां रक्षयितुमसक्ता घोरापमानपीडां सोढ्वापि वनेऽत्र तपश्चरन्तः कालं प्रतीक्षन्ते। इति।

कीदृशी क्रोधाभिव्यञ्जना दृश्यते पाञ्चाल्याः। अनेन तस्या आक्रोशः सहसैव परिलक्ष्यते। कौरवान् सम्बोधयन्ती सा ब्रवीति- 'दुःशासन! नीचनराधम! त्वमिदानीं चापि जीवसि। आह रे दुर्योध न! त्वदीया जंघाऽद्याप्यभङ्गैव वर्तते। परमरे! अबलापमानिन्! पश्य रे! पश्यैतां धूमायमानां प्रज्वलन्तीमग्निशिखोपमां मे जटिलामुन्मुक्तवेणीम्! पश्य रे! इयं याज्ञसेनी वनेषु प्रतिपदं तव स्मरन्ती केवलं भीमप्रतिज्ञां सफलीकर्तुमेव जीवनं धरति।' इति। नाटकेऽस्मिन् सैरन्ध्रीवाक्येन तत्कालीनं समाजमपि भर्त्सयति कविः। यथा-

दिक्षु सर्वासु धावन्ती रुदन्ती ते प्रियात्मजा।
सभामध्येऽर्धनग्नाऽपि रक्षिता न धनुर्धरैः॥[1]

अर्थात् सभामध्य एव आर्यललनोन्मुक्तापमानो घोरपरिहासश्च जातः परं न केनापि नार्याः स्वाभिमानो रक्षित इत्यहो समाजस्य निष्ठुरता। अनेन साम्प्रतिकं समाजं सावधानं कुर्वन् तदीयं सामाजिकं दायित्त्वञ्चापि स्मारयति कविरित्यहो दूरदर्शिता कवेः। अत्र चोच्यते द्रौपद्या- श्रृणु रे! कुरुकुलधूमकेतो!-

सर्पिणीव स्फुरन्तीयं, वेणी मे जटिलाकृतिः।
त्वद्वक्षः क्षतजं पातुं कालमेव प्रतीक्षते॥[2]

अनेन तस्या आक्रोशः प्रकटितो भवति। वनवासकालेऽपि तस्याः हृदये सर्वदा क्रोधाग्निः प्रज्वलिता एवासीत्। तत्र च साक्रोशं कथयति द्रौपदी- नाथ! एष वनवासकालोऽकालेऽपि मां कवलीकरिष्यति। यतः -

दुर्लङ्घ्योऽभूदयं कालो दुःसहा वनवासिता।
हृदिस्थः प्रतिशोधाग्निः प्राणान् मे धक्ष्यति ध्रुवम्॥[3]

---

1. तत्रैव-1-18
2. तत्रैव-1-20
3. तत्रैव-1-23

तत्र द्वादशावधिर्दुस्तरो वनवासकालः पाण्डवैर्यापितः। इदानीमज्ञातवासस्य वर्षावधिसमयः समागतोऽस्ति। अज्ञातवासोऽभिज्ञानं विनैव कथं समापनीय इत्यस्य विचार-विमर्शाय युधिष्ठिरेण पाञ्चालीसहितस्वानुजा आमन्त्रिताः। तदानीमपि द्रौपद्या आक्रोशः स्फुटीभवति। यथा- 'जानामि परामर्शविधि मार्यधर्मराजस्य। सर्वत्र सदैवासौ स्वयमेव प्रस्तावकः, स्वयमेव समर्थकः, स्वयमेव निर्णायकश्चापि। तत्किमनेनोपचारेण।'[1]

चर्चाक्रमेऽपि द्रौपदी युधिष्ठिरप्रस्तावं नाभिनन्दति प्रत्युत धर्मराजस्याशा केवलं दुराशैव इति वदति। वचनपरिपालनमथ च सत्यव्रतपालनमिति युधिष्ठिरस्य यः पक्षः तदपि न रोचते पाञ्चाल्यै। तत्र युधिष्ठिरं भर्त्सयन्ती कथयति सा - 'आर्यपुत्र! इयं कीदृशी धर्माधर्मविवेचना? द्यूते वचनपालनं धर्मः। सभायां कृतार्धनग्नाया अबलाया दुर्जनाद् रक्षणमधर्मः।[2]

अत्रापि द्रौपद्या आक्रोशः समाजाय नैके गम्भीरप्रश्नाः समुत्थापिताः। वस्तुतो दुर्जनाद् नार्या रक्षणं परमो धर्मः। यतो नारी श्रद्धेया आदरास्पदं सम्माननीया संरक्षणीया च भवति परिवाराय समाजाय राष्ट्राय च। परमिदानीमपि विपरीतमेव दरीदृश्यते - येऽधर्मिणः त एव धर्माधर्मविवेचकाः? येऽसत्यवादिनस्ते एव सत्यनिष्ठापराः? ये परोक्षरूपेण नारीभिः सह दुर्व्यवहारमपमानञ्च कुर्वन्ति, त एव नारीसमाजस्योन्नायका इति डिण्डिममुद्घोषयन्तीत्यहो विडम्बना।

नाटके युधिष्ठिरोऽपि स्वीकरोति तथ्यमिदम् । यथा- जानामि पाञ्चाल्या आक्रोशम्। असौ तस्या अन्तःपीडामेवोन्मुखी कुरुते। परमेतत् समयसापेक्षमेवोचितम्। इदानीं यथा वनवासो भुक्तस्तथैवाज्ञातवासोऽपि भोग्य एवास्माभिर्यतो यद्विधिविलसितम्, यद् घटनापटीयसी नियति नटी विधास्यति तत्तु भोग्यमेव, परं संभाविनो युद्धस्य दोषभाजो वयं न स्याम तद्विधेयम्। तथाहि-

गच्छामो यदि हस्तिनापुरमितोऽप्यज्ञातवासं विना,
सन्धेर्भङ्गवशाद् वदेम च कथं राज्याधिकारं प्रति।
युद्धं चेत् क्रियते तदापि भविता दोषोऽस्मदीयो भुवि,
शत्रोरेव हिताय पाण्डवयशोनाशाय वै निर्णयः॥[3]

सत्यमपि जीवने दुःखं धैर्यबलेन वैभवसुखं च निर्लिप्तभावेन भोग्यम्। विपदासु सत्यं धर्मं कीर्तिञ्च बलपूर्वकं रक्षेत् नरो यतो धरायामस्यां सर्वमर्जितं सुखसंसाधनं नश्वरमेव, केवलं सद्गुणैरर्जितं यश एवाक्षरं भवति।[4]

---

1. तत्रैव-1, पृ.-14
2. तत्रैव-1, पृ.-20
3. तत्रैव-1-40
4. तत्रैव-1-41 यद् देयं विधिना भवेदिह जनैर्भोग्यं सदा जीवने,
   दुःखं धैर्यबलेन वैभवसुखं निर्लिप्तभावेन च।

इत्थं स्वभ्रातृभिः सह विचारविमर्शानन्तरं युधिष्ठिरेण निर्णयः कृतो यदेकवर्षायास्माभिर्गुप्तस्थानेऽज्ञातवासो विधेयः। तच्च स्थानमिदानीं मत्स्यराज्यं वर्तते। तदेवास्माकमशरणानां शरणम्। तत्र स्वकीयगुणवैशिष्ट्यप्रभावेणास्माभिर्वस्तव्यमिति युधिष्ठिरस्यादेशः। द्रौपद्याः कृते महादेव्याः सुदेष्णाया दासीत्वेन तत्र प्रवेशो भवेदिति निर्णयः। यथा च कथयति युधिष्ठिरो नाटके - तत्र मार्गद्वयम्। सखीभावेन वा दास्येन। मद्विचारेण प्रथमं दास्यभावेन प्रवेशो भवेत्। तदनन्तरं स्वगुणप्रभावेण सख्यं चापि संभाव्यते।[1]

अत्रापि द्रौपद्या आक्रोशः स्फुटितो यथा- विपदामन्धकारे काचिद् दुर्घटना भवेत्, तदा को नाम रक्षेदिमां दासीम्। परमहं नारी, परगृहवासो दासीरूपेण, शङ्कां तु जनयत्येव। तथाप्यहं पालयामि आर्यपुत्रादेशम्। इत्थं योजनानुसारं सद्रौपदीपाण्डवाः विराटराज्ये प्रविष्टाः। तत्रापि नार्याः संघर्षः प्रारभ्यते। नाटकस्य द्वितीयाङ्के विराटनगरोपवने एकाकिनी प्रविष्टा सैरन्ध्रीनामधेया द्रौपदी कीदृग् मनोवेदनया पीडिता दृश्यते। यथा- द्रौपदी- अहो दैव! त्वत्कृपया मयैकजन्मन्येव नैकजन्मानुभूतिरधिगता। तथाहि-

प्रखरदहनमध्यात् संप्रसूयाग्निपुत्री, द्रुपदनृपतिगेहे वैभवैर्लालितापि।
शशिकुलपरिणीताऽसौ वधूः पाण्डवानां, भ्रमति पथि पदातिर्दासतामीहमाना।।[2]

तत्रोपवने राजदासीसन्मुखे वार्तायां पाञ्चाल्या वाक्चातुर्यं सहृदयानां मनोरञ्जनाय कल्पते, ततो राजदासीसमर्थनादेवासौ सुदेष्णया सह वार्तया महाराज्ञीं तथा प्रभावयति यथा सा पाञ्चालीं पाञ्चाल्या दासीं मन्यमाना तां स्वकीयामपि सैरन्ध्रीदासीं स्वीकरोति। स्ववाक्चातुर्येणैव पाञ्चाली स्वोद्देश्यं सफलीकरोति। अत्रापि लेखको दासीमुखेन नार्यपमानं भर्त्सयति- यथा- माधवी-

किमतः परमपि घोरः पुरुषाणां विद्यते दुराचारः।
वस्त्राहरणं नार्या विलपन्त्यास्तत्सभामध्ये।।[3]

मल्लिका- साक्रोशम्- 'अनेन दुष्कृत्येन कौरवैर्न केवलं पाञ्चाली समस्तनारीजातिरेवापमानिता दुर्जनानां कदर्य पौरुषेण।' वाक्यमिदं नार्या आहतस्वाभिमानस्य लोकनिन्दा इति वक्तुं शक्यते, यतः तत्र विराटराज्यस्य दास्या आक्रोशोऽयम्।

अत्रैव कौरवैरपमानितां द्रौपदीं प्रति सहानुभूतिप्रदर्शनेन सहैव सुदेष्णामुखात् दुर्जनपुरुषाणामत्याचारविरोधे नारीशक्तिसमर्थनं कुरुते, नार्या आवाहनमपि करोति कविः, तद् यथा- सुदेष्णा-परं ये धूर्ताः

सत्यं धर्ममथापदासु पुरुषो रक्षेत् स्वकीर्तिं बलात्,
सर्वं नश्वरमर्जितं भुवि गुणैरेवाक्षरं सद्यशः।।

1. तत्रैव-1,पृ.-24
2. तत्रैव-2-1
3. तत्रैव-2-5

क्रूरा: तेभ्यो मदीयमेतदुद्बोधनम्-

धूर्तैरात्महिताय शोषणमिदं नारीजनानां यथा,
सर्वत्र क्रियते बलादपकृतिर्या दुर्जनैर्दुःसहा।
नारी तत्प्रतिकर्तुमुद्यतवती नो चेत् स्वयं साहसात्,
उद्धर्तुं भुवि शक्नुते न पतनादेनां नु को निर्बलाम्।।[1]

इति कृत्वाऽबला मन्यमाना सुदेष्णा तां वदति-

पाञ्चाल्याः प्रियदासी चेन्ममापि स्नेहभाजनम्।
सखीभावेन मत्पार्श्वे, निवसेस्त्वं निरापदम्।।[2]

नाटकेऽस्मिन् नारीशक्ते आवाहनमित्थं करोति कविर्दुष्टानां संहरणाय-तावत् पर्यन्तमेव नार्या लज्जाहरणम्, बलाद्घर्षणम् धरायामबलापीडनादिकं कृत्यं भविष्यति यावत् दुर्विषहं समेकितबलं शौर्यं वहन्ती स्वयं नारीशक्तिरियं दुष्टात्मनां संहरणं न करिष्यतीति।

वस्तुतः कवेरभिप्रायोऽस्ति यत् सर्वाभिर्नारीभिर्दुखितनार्याः साहाय्यं विधाय स्वकीयो नारीधर्मः सम्पादनीय इति। वस्तुतो नारी तु साक्षात् करुणामूर्तिस्तद् दर्शनमेव मङ्गलं प्रसूते। इयमेव विश्वश्रेयसे चोपतिष्ठते। तथाहि-

करुणास्नेहवात्सल्य - साहसौदार्यधीरताः।
लोकमङ्गलमुल्लासो नार्यास्तु सहजागुणाः।।[3]

तत्र च कथयति द्रौपदी- सत्यम्, एतैर्गुणैरेव नार्या गौरवम्। विश्वमङ्गलाभिलाषिणी नारी कस्याप्यहितं नैव वाञ्छति। तथाहि-

अर्धनारीश्वरो भूत्वा भगवान् शङ्करः स्वयम्।
प्रतिपादितवान् नार्या गौरवं किमतः परम्।।[4]

कीदृशो हृदयोद्गारो द्रौपद्याः, अनेन तस्याश्चरित्रवैशिष्ट्यं परिलक्ष्यते।

स्वयं सैरन्ध्रीवेशेऽपि सा तत्र सर्वप्रियाऽऽसीत्। सुदेष्णायाः सा सखी जाता। राजकुमारी उत्तरा तस्यै मातृरूपेण स्निह्यति। सा तां कलां शिक्षते। चित्रमाध्यमेनोत्तराया हृदयेऽभिमन्युकृते पूर्वरागमुत्पादयति। तृतीयाङ्के दासीरूपेण सुदेष्णां सेवमानाया द्रौपद्या मनोदशाया निर्वेदभावः स्पृशति हृदयं सहृदयसामाजिकानाम्, यथा-

1. तत्रैव-2-12
2. तत्रैव-2-8
3. तत्रैव-2-13
4. तत्रैव-2-14

'यथा निर्दिष्टं महादेव्या, तथा साधितं सर्वम्। का गतिरिदानीं मदीया। समयस्तु नेतव्य एव। सुखेन वा स्याद्, दुःखेन। एकदाऽऽसं पट्टमहिषी। इदानीं पट्टदासी कृता दैवेन। विराटनगरेऽज्ञातवासोऽयं दुःसहो विद्यते। परं किं करोमि। स्वपतिं युधिष्ठिरं प्रत्यपि साक्रोशासौ वदति–

ऐश्वर्यं जनशक्ति राज्यमखिलं वंशप्रतिष्ठा भुवि,
कीर्तिं दिग्विजयेन वै भुजबलैर्यद् बान्धवैरर्जितम्।
हुत्वा तद्धि दुरोदरानलमुखे लज्जा कुलस्याप्यसौ,
धर्मज्ञः स्वकुलस्य पट्टमहिषीं हा पट्टदासीं व्यधात्॥[1]

परं सा कदापि भाग्यसन्मुखे शस्त्राणि न समर्पयति, प्रत्युत सदा पौरुषबलेन प्रतिशोधप्रतिकारं समर्थयति, प्रेरयति च पाण्डवान् तथा कर्तुमित्यहो तस्या साहसबलम्।

तृतीयाङ्के उपवने सा प्रथमं कीचकं पश्यति, यस्तद्रूपसौन्दर्यमुग्धः तस्या मार्गं बाधते। तदा सा कीचकं प्रति कथयति– 'नार्या मार्गमवरोधयन्न लज्जसे दुराचारिन्। अपराधिन् त्वया प्रतिकूलमाचरितम्। प्रमदवने त्वमित्थमाचारन्निदानीं दण्डनीयोऽसि।'

अनेन तस्याः प्रतीकारः प्रदर्शितो भवति। यदा सा सुदेष्णां प्राप्नोति, तत्रापि कीचक उपेत्य तां धर्षयति। ततोऽसौ पाञ्चाल्याः करं गृह्णाति। तदैव तत्र दासी पदे वर्तमानाया अपि कीचकं प्रति तस्या आक्रोशः प्रस्फुटति। यथा–सैरन्ध्री– (झटिति करमुन्मोच्य) अरे रे! नराधम! सूतापसद्! नीच! कीचक! तज्जानीहि रे! दिव्यगन्धर्वसंरक्षिता नाहं तादृशी दुर्बला, यां कश्चिन्नराधमो धर्षयेत्। तच्छृणु रे!–

अलमासीत् कटूक्तं ते दण्डाय पुरुषाधमः।
कालः स्वयं समाहूतो मत्करस्पर्शिना त्वया॥[2]

कीचकस्य सीमायुद्धे सैनिकैः सह गमनानन्तरमेकाकिनी द्रौपदी नितरामाक्रोशेन व्याकुलीभूय ब्रूते– 'आह! गतोऽसौ वाग्वज्रेण वक्षःछेदं विधाय दुरात्मा ----- पीडान्तकौषधिस्तु केवलं प्रतिशोध :, आम् प्रतिशोध एवास्यौषधम्। तज्जानीहि रे नरपिशाच! नेयं सैरन्ध्री दुर्बला सामान्या नारी। यज्ञज्वालागर्भसंभूताग्निशिखेव दंदह्यमानेयं पाञ्चाली त्वद् दुर्वाग्विस्फोटेन पुनरुज्ज्वलन्ती त्वां भस्मीकर्तुं वर्धिष्यते नितरां वर्धिष्यते। श्रृणु रे नीच! कीचक! –

पापिन्! त्वन्मुखमर्दनेन कुटिलामुत्पाट्य जिह्वामिमां
भग्नं दुर्मद! ते शिरो भुजबलं यावन्न पश्याम्यहम्।

---

1. तत्रैव–3/5
2. तत्रैव–2/17 पृ. 64

तावत् तद् विषमापमानवचनैर्दन्दह्यमानो हृदि
दुर्धर्षः प्रतिशोधवह्निरनिशं शाम्येन्न रे कीचक॥[1]

चतुर्थाङ्के कञ्चुकी मञ्चे प्रविश्य सैरन्ध्रीं तत्कार्यव्यापारचातुर्यं तत्कलाकौशलञ्च प्रशंसति। तस्या वाग्व्यवहारोऽपि विलक्षणः। वस्तुतः समागतेयं कल्याणी सैरन्ध्री। अनेन तस्याश्चारित्रिकं वैशिष्ट्यमुद्घाटितं भवति।

पञ्चमाङ्के– पाञ्चाल्या दुर्नियतिस्तस्या दुर्दशां क्रमशो वर्धयति। कीचकः सीमायुद्धात् पुनर्विराटनगरमागतः। आगत्यासौ भगिनीं सुदेष्णां प्राप्य तां सैरन्ध्रीं याचते। सुदेष्णा वारयति कीचकं– 'जानीहि रे नासौ स्वैरिणी। पतिपरायणा सा, मनसापि परपुरुषं नैव चेष्टते। सा सदाचारवती' तं भयं दर्शयति–'सा महाबलैर्गन्धर्वैः सततं संरक्षिता। नैव सा त्वां शृणोति, नैव वार्तामनुमन्यते नैव मधुरं व्यवहरति।' महादेव्या एभिर्वचनैः तस्याः स्वरूपं प्रकाश्यते।

षष्ठाङ्के– सैरन्ध्री स्वर्णमदिरापात्रं प्रदर्शयन्ती मञ्चे प्रविशति। सुदेष्णया निर्दिष्टा मदिरामानेतुं कीचकगृहं गच्छति। यथा अहो दुर्दैव ! सत्यं त्वया दासी कृतास्मि। तत्प्रभावश्चानुभूयते मयेदानीम्। महादेव्या प्रदत्तमेतत्, मदिरामानेतुम्। जानासि कुतः .... कीचकगृहात्। यो मां स्वरक्षितां विधातुं सततं विहितप्रयासो वर्तते। इदानीं मे जीवनमरणप्रश्नो वर्तते। अहं चापि ज्वलदग्निसंभवास्मि ..... सर्वं भस्मसाद् भविष्यति।

सुदेष्णाऽऽदेशं पालयन्त्या अपि सैरन्ध्रया आक्रोशो नूनमेव संघर्षोन्मुखो विद्यते। तच्छीघ्रमेव प्रत्यक्षं जायते, यदा मदोन्मतः कीचको द्वारिस्थितां तां करं गृहीत्वा कर्षति। तदा सा हस्तमुन्मोच्य, पात्रेण तस्य शिरसि ताडयित्वा पलायते। यद्यपि मार्गे कीचकेन गृहीत्वा सा पादप्रहारैस्ताडिता। अनन्तरं राजसभायामपि पाञ्चाल्या सैरन्ध्रीरूपाया आक्रोशः साहसः स्पष्टवादिता च तस्या निर्भीकतां सत्यतां स्वाभिमानञ्च प्रदर्शयन्ति। सभामध्ये सा कीचकस्य दुर्व्यवहारं वदन्ती 'असौ मां स्वरक्षितां विधातुं बहुकालात् प्रयत्नशीलः' इति सूचयति, तदा विराटराजा विहस्य तां वदति– 'बलाध्यक्षस्य रक्षिता! एतत्ते सौभाग्यम्' इत्यस्य कथनस्य यदुत्तरं ददाति सैरन्ध्री, तेन नारीसमाजाय कीदृशः संघर्षोऽपेक्षित आसीत् तदानीं तस्यापि चित्रणं जायते । यथा–

सैरन्ध्री – अहो विराटराज्याधीशः! किमत्र राज्ये दासीनामीदृशं सौभाग्यं प्रदीयते। दासी, दासी परमेषापि मानवी। अहं चापि जानामि मानवाचरणम्, आचरामि स्वजीवने, तद्विरोधे, उतिष्ठामि। तद् महाराज–

दासीमपि परपत्नीं हर्तुं समुद्यतं दुष्टम्।
राजा यदि न दण्डयेत् को रक्षेत् तत्प्रजालज्जाम्॥[2]

1. तत्रैव 3–23,पृ.–68, 69
2. तत्रैव –6/4

तत्र राजसभामपि भर्त्सयति सैरन्ध्री। यथा– हा हतास्मि, नारीदुर्दशां पश्यन्तोऽपि वधिरान्ध वद् वर्तन्तेऽत्र सभ्यजनाः। यथा–

ताडयत्येष निर्लज्जः, सभायामवलामिमाम्।
पश्यन्ति सुस्थिराः सभ्याः काष्ठपाषाणमूर्तयः।।[1]

अत्रत्याः सभ्या अभिजाताः पश्यन्तोऽपि वधिरान्धा इवाचरन्ति। धर्माध्यक्षः !–

क्रूरोऽप्येष नराधमो यदि सभामध्ये समक्षं तव,
हन्याद् दुर्बलसेविकां यदबलां पादप्रहारैर्दलन्।
मत्तोऽयं वनिताजनानपहरेत् ते श्यालको निर्भयः,
का नारी प्रभवेत् सुरक्षितमसौ लज्जां त्वदीये पुरे।।[2]

इत्थं नारीसंघर्षाय पाञ्चाल्याः सभामध्ये डिण्डिमोद्घोषोऽयम्। तत्रैव सभामध्ये स्वयं महाराज्ञी प्रविश्य स्वभ्रातुः कीचकस्य समस्तदुष्कृत्यानामुद्घाटनं करोति। तेन सह स्वकीयस्य सम्बन्धस्यापि समापनं घोषयांचकार । तत्प्रभावेण राजसभामध्ये कीचको लज्जितोऽभूत्। यथा–

सैरन्ध्री, इयं नारी स्वदुर्भाग्याद् दासी परमियं देवी चारित्र्येण महनीया। परं त्वया दुराचारिन्! अस्या जीवनं कठिनीकृतम्। कीदृग् दुराचरितं त्वयाऽस्मिन् राज्ये। तदर्थं मया सहैव महाराजोऽपि दोषभाग् वर्तते। अद्यारभ्य नाहं ते भगिनी न त्वं मदीयो भ्राता। नायं मदीय आक्रोशो ममायं संकल्पः। तथैव नेयं दासी, महनीया नारी। यो जनः स्वपौरुषोन्मादेन निरपराधिनीं नारीमवमानयेत् तदसौ नराध मो निश्चितमाततायी शास्त्रानुसारमक्षम्योऽपराधी कठोरदण्डमर्हति। प्रशस्तमेतस्याः साहसिकं सत्कृत्यम्।[3]

कीचकस्य क्षमायाचनया तत्र सभा विसर्ज्यते। परं सैरन्ध्री सभाविसर्जनेऽपि तत्रैव स्थिता आक्रोशपरा विद्यते। यथा– सैरन्ध्री– गताः सर्वे, केवलं दीप्ताग्निशिखां विहाय, अरे कीचक! त्वयि जीवति मज्जीवनं व्यर्थम् ----- तिष्ठ रे कीचक तिष्ठ, इयमग्निशिखा त्वां भस्मीकृत्यैव शान्तिमेष्यति।[4] कीचकवधानन्तरं सा रहस्यमयी भूता। सर्वेषां धारणा विद्यते यत्कीचको अनयैव गन्ध र्वद्वारा निहतः। सत्यमपि द्रौपद्याः संघर्षेणैव कीचकस्य विनाशः सम्भवो जातः। इत्थं नाटकेऽस्मिन् पाञ्चाल्याः पुरुषाणामन्यायात्याचारयोर्विरोधे प्रबलसंघर्षभावना अस्मान् प्रभावयति।

नारीजनान् प्रति दुराचारापमानक्रूरहिंसापथवर्तिनां दुर्जनानां विरोधे पाञ्चाल्या अयं प्रथमो नारीसंघर्ष आसीत्। नार्या अस्मितायाः स्वाभिमानस्य च रक्षार्थं तस्याः प्रथमजागरणोद्घोष एव आसीदिति वयं मन्यामहे। वस्तुतो नाटकस्योद्देश्यमेव नारीजागरणं नार्याः शौर्यप्रदर्शनञ्च। समाजे नार्याः गौरवस्थापनमपि

1. तत्रैव–6/6
2. तत्रैव– 6/9
3. तत्रैव 6–पृ.–114,115
4. तत्रैव–6–पृ.–119

च नारीसमाजं प्रति दुराचारिणामवमाननं दुरात्मनां पतनञ्च। नाटकस्यान्ते भरतीयनाट्यपरम्परामनुसृत्य यद् भरतवाक्यं प्रस्तुतं तदपि सामाजिकं समाजजीवनं सत्पथमेवोपदिशति। तद् यथा-

सम्मानं लभतां समाजसमतां नारीजनो गौरवम्,
आतङ्कःशमनं प्रयातु मनुजा जीवन्तु सत्कर्मणा।
निःस्वार्थं परिपालयन्तु जनतां सत्यव्रता नायकाः,
विश्वं भारतसंस्कृतिर्नवयुगे संदर्शयेत् सत्पथन्॥

इत्यलम्।

पुराणेषु तीर्थानां स्वरूपम्

डॉ. शीतलाप्रसादशुक्लः

तीर्यन्ते स्थानानि बन्धनकारणानि येन तत् तीर्थम्। अनया व्युत्पत्त्या अस्मिन् संसारे प्रायशः स्थानानि बन्धनकारकाणि भवन्ति। यतोहि स्थाने निवसमानः जीवः प्रायः तत्स्थलेन सह आत्मीयतां भावयति। भावोऽयमेव बन्धनकारकः।

तीर्थानि तादृशानि स्थानानि भवन्ति यत्र गत्वा जीवानां मोहभावः क्षीणतामुपैति तेन च भक्तिमुक्त्यादिनां प्राप्तिर्भवति। अतः पवित्रीकरणार्थे प्रायः तीर्थशब्दः प्रयुक्तः, ऋषिमहर्षिसाधक-सिद्धमहापुरुषादीनां कृतेऽपि तीर्थसंज्ञा प्रदत्ता। भगवदीयगुणानुबद्धहृदयानां महामानवानां शरीरे तीर्थानामपि पवित्रीकरणे सामर्थ्यं भवति। उक्तम्-

तीर्थीकुर्वन्ति तीर्थानि[1]

श्रुतिस्मृतिपुराणोपपुराणरामायणमहाभारतेत्यादिग्रन्थेषु तीर्थानां महिमा वर्णिता अस्ति। विशिष्टतया पद्मपुराणे स्कन्दपुराणे च तीर्थानां बृहती व्याख्या अस्ति। भारतीयधर्मग्रन्थेषु त्रिप्रकारकाणि तीर्थानि परिगणितानि- 1. जङ्गमम् 2. मानसम्, 3. स्थावरम्।

तीर्थानि च।

जङ्गमबृहद्धर्मपुराणानुसारं ब्राह्मणचरणानि गवां पृष्ठसन्तजनानाम्, बालकानां शिरस्थानम्, मनुष्याणां दक्षिणकर्णं च जङ्गमतीर्थानि भवन्ति।

मानसम्- मानसतीर्थानि शास्त्रानुसारं सत्य-क्षमा-दान-तप-इन्द्रियनिग्रह-ऋजुता-मनोनिग्रह-सन्तोष-ब्रह्मचर्य-प्रियभाषण-विवेक-धृति-चित्तनिर्मलत्वादीनि मानसतीर्थानि ।

अस्मिन् विषये स्कन्दगरुडनृसिंहादिपुराणेषु उक्तमस्ति यत् -

सत्यं तीर्थं क्षमा तीर्थं तीर्थमिन्द्रियनिग्रहः।
सर्वभूतदया तीर्थं तीर्थमार्जवमेव च।।[2]
दानं तीर्थं दमस्तीर्थं संतोषस्तीर्थमुच्यते।
ब्रह्मचर्यं परं तीर्थं तीर्थं च प्रियवादिता।।[3]

1. नारद भक्ति सूत्र सं0 69
2. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
3. स्कन्द पुराण काशी खण्ड अध्याय सं0 6

ज्ञानं तीर्थं धृतिस्तीर्थं तपस्तीर्थमुदाहृतम्।
तीर्थानामपि तत्तीर्थं विशुद्धिर्मनसः परा।।[1]
न जलाप्लुतदेहस्थस्नानमित्यभिधीयते।
स स्नातो यो दमस्नातः शुचिः शुद्धमनोमलः।।[2]
यो लुब्धः पिशुनः क्रूरोदाम्भिको विषयात्मकः।
सर्व तीर्थेष्वपि स्नातः पापो मलिन एव सः।।[3]
न शरीरमलत्यागान्नरो भवति निर्मलः।
मानसे तु मले त्यक्ते भवत्यन्तं सुनिर्मलः।।[4]
जायन्ते च म्रियन्ते च जलेत्यव जलौकसः।
न च गच्छन्ति ते स्वर्गमविशुद्धमनोमलाः।।[5]
विषयेष्वतिसंरागो मानसो मल उच्यते।
तेष्वेव हि विरागोऽस्य नैर्मल्यं समुदाहृतम्।।[6]
चित्तमन्तर्गतं दुष्टं तीर्थस्नानान्नशुद्धयति।
षतषोष्पि जलैर्धौतं सुराभाण्डमिवाशुचिः।।[7]
दानमिज्या तपःषंचं तीर्थसेवा श्रुतं तथा।
सर्वाण्येतानितीर्थानि यदि भावो न निर्मलः।।[8]
निग्रहीतेन्द्रियग्रामो यत्रैव च वसेन्नरः।
तत्र तस्य कुरुक्षेत्रं नैमिषं पुष्कराणि च।।[9]
ध्यानपूते ज्ञानजले रागद्वेषमलापहे।
यः स्नाति मानसे तीर्थे स याति परमां गतिम्।।[10]

1. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
2. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
3. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
4. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
5. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
6. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
7. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
8. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
9. स्कन्द पुराण काशी खण्ड अध्याय सं0 6
10. स्कन्द पुराण काशी खण्ड अध्याय सं0 6

स्थावरतीर्थानि– अस्यां वसुंधरायां असंख्यातानि तीर्थानि भक्त्यै जीवानां मुक्तये च स्थितानि सन्ति येषु प्रमुखानि सन्ति। प्रयाग–काशी–मथुरा–अयोध्या–नैमिषारण्य–कुरूक्षेत्र–पुष्कर–हरिद्वार–बदरिकाश्रम–केदारनाथ–श्रीशैल–काञ्ची–सेतुबन्ध–रामेश्वर–गङ्गा–यमुना–सरस्वती–सरयू–गोमती–गोदावरी–नर्मदा–कावेरी–कृष्णा–मन्दाकिनीत्यादीनि।

वेदेष्वपि तीर्थानां विषये कथितम्–

इमं मे गङ्गे यमुने सरस्वती।
शतुद्रि स्तोमं सचता परूषण्या।
असिक्न्यामरूद्‌वृधे वितस्तथाऽऽ–
र्जीकीये श्रृणुगुह्यासुषोमया।।[1]
सप्तापो देवीः सुरणा अमृक्ता
याभिः सिन्धुमतर इन्द्रपूर्मित।
नवति स्त्रोत्य नव च स्नवन्ति
र्देवेभ्यो गातुं मनुषे च विन्दः।।[2]
उ तमे प्रयिवोर्वयियोः
सुस्वास्त्वा अधि तुग्वनि।
तिसृणां सप्ततीनां श्यावः
प्रणेता भुवद् वसुर्दियानां पतिः।।[3]
यत्र गङ्गा च यमुना च
यत्र प्राची सरस्वती
यत्र सोमेश्वरो देवस्तत्र
माममृतं कृधीन्द्रायेन्दो परिस्त्रव।।[4]
सतासिते सरिते यत्र सङ्‌गये
तत्रप्लुतासो दिवमुत्पतन्ति।
ये वै तन्वं विसृजन्ति धीरा
स्ते जनासो अमृतत्वं भजन्ते।।[5]

---

1. ऋग्वेद मं0 10 सू0 75 म0 5
2. ऋग्वेद मं0 10 सू0 104 म0 8
3. ऋग्वेद मं0 8 सू0 19 म0 37
4. ऋक् परिशिष्ट
5. ऋक् परिशिष्ट

योगवशिष्ठानुसारं मर्यादापुरुषोत्तमः श्रीरामः स्वभ्रातृभिः सह सर्वेषां तीर्थानां पर्यटनं चकार। येषु गङ्गा, यमुना, सरयू, सरस्वती, शतद्रु(सतलज), चन्द्रभागा(चिनाब), ईरावती(रावी), वेणी, कृष्णावेणी, निर्विन्ध्या, चर्मण्वती, (चम्बल) वितस्ता(झेलम), विपाशा(व्यास), वहुदा, प्रयागः, नैमिषारण्यम्, धर्मारण्यम्, गया, वाराणसी, श्रीशैलम्, केदारनाथः, पुष्करः, मानसरोवरः, उत्तरमानसवाङ्मुखः, इन्द्रद्युम्नसरोवरः, विन्ध्यपर्वतः, मन्दराचलकुञ्जः, हिमालयः, तथा सातकुलपर्वतः, चतुर्सागराणां विष्णु शिवस्य च चकार।[1]

तीर्थानां परिकल्पना तदैव साकारतां यास्यति यदा जीवाः भगवतः शिवस्य कथालीलामन्दाकिन्यां स्नानं विधास्यति, सृष्टिमारभ्यप्रलयपर्यन्तं बद्धसमाधिः यो हि देवः जीवकल्याणाय तपश्चरति सैव महादेवः शिवः। सैवात्यान्तिकप्रलयमाध्यमेन समेषां जीवानां बन्धनबीजानि उन्मुच्य तेभ्यो मुक्तिं प्रयच्छति। वस्तुतः वयं शिवतत्वपरिचये प्रायशाः भ्रान्ताः स्मः। शिवस्य प्रकाशस्वरूपं तृतीयं नेत्रं लोककल्याणायैव परिज्ञातमस्ति। भगवतः शिवस्य कण्ठे भगवत्याः अष्टोत्तरशतजन्मनां मुण्डमाला एव स्थितास्ते। सेयं प्रेममयी गाथा। विश्वरञ्जनं च शिवशक्त्योः दिव्यातिदिव्यस्य मधुरातिमधुरस्य प्रीतिप्रसङ्गस्य लीलायामेव प्रचलति। सती पत्युः शिवस्यापमानं असहमाना क्षणैव देहं तत्त्याज सत्याः एतादृशाः पातिव्रतधर्मस्य ऐतिह्यगाथां मानदण्डमिवास्ति। मृतायाः भगवतो रुद्रस्य पत्न्याः सतीदेव्याः देहं स्वशिरसि आधाय यद्भ्रमणमासीत् तदानीं तत्काले सत्याः अङ्गानि विशीर्णानि। तत्र तत्र पीठानि सञ्जातानि यानि तीर्थान्युच्यन्ते।

गोत्रं त्वदीयं भगवान् वृषध्वजो,
दाक्षयणीत्याह यदा सुदुर्मनाः।
व्यपेतनर्मस्मितमाशु तद्ध्यहं,
व्युत्स्रक्ष्य एतत्कुणपं वदङ्गजम्॥[2]

कृत्वा समानावनिलौ जितासना,
सोदानमुत्थाय च नाभिचक्रतः।
शनैर्हृदि स्थाप्यधियोरसि स्थितं,
कण्ठाद् भ्रुवोर्मह्यनिन्दितानयत्॥[3]

एवं स्वदेहं महतां महीयसा,
मुहुः समारोपितमङ्कमादरात्।
जिहासती दक्षरुषा मनस्विनी
दधार गात्रेष्वनिलाग्निधारणाम्॥[4]

1. योगवाशिष्ठ सर्ग 3
2. श्रीमद्भागवतमहापुराण 4/4/23
3. श्रीमद्भागवतमहापुराण 4/4/25
4. श्रीमद्भागवतमहापुराण 4/4/26

ततः स्वभर्तुश्चरणाम्बुजासवं
जगद्गुरोश्चिन्तयति न चापरम्।
ददर्श देहो हतकल्मषः सती,
सद्यः प्रजज्वाल माधिजाग्नना।।[1]

भगवती साक्षात् जगदम्बा जननी व्यक्ताव्यक्ते जगति तस्यैव छविः विस्तृतमेव। प्रकृतिः प्रतिकणे ऋषिमहर्षिसाधकसिद्धाः सत्या एव सौन्दर्यपानं कुर्वन्ति, सैव भगवती अकारणकरुणावरुणालया सगुणा निर्गुणा च भूत्वा सर्वत्र लीलायते।

अवतारा हरेरेवं प्रभवन्ति युगे युगे।
योगमाया प्रभावेण नात्र कार्या विचारणा।।[2]

या नेत्रपक्ष्मपरिसञ्चलनेन सम्यक्-

विश्वं सृजत्यवति हन्ति निगूढभावा।
सैषा करोति सततं द्रुहिणाच्युतेशान्।।[3]

व्याघ्रपादस्मृतिः कथयति यत् असन्तुष्टस्य कृते सुखप्राप्तिर्नभवति क्षुद्रमानुषाय न धर्म प्राप्तिर्भवति।

असन्तुष्टे सुखं नास्ति न धर्मः क्षुद्रमानुषे।।[4]

पद्मपुराणे सुब्रताख्यब्राह्मणस्य कथा प्राप्यते या खलु विद्वान् सन्नपि धनलोभवशात् स्वकर्तव्यानि विस्मृत्य मरुभूमौ स्वजीवनं अज्वालयत्। एकदा निपुणाः चौराः सर्वमपि गृहीत्वा अदृश्याः तदनन्तरं धननाशात् उद्विग्नः असौ वैराग्यं गृहीत्वा तीर्थसेवनाय माघमासे नर्मदातटमागत्य नित्यस्नानमाचरत्। शीताधिक्यात् तस्य पाञ्चभौतिकं कलेवरं त्यक्तुं प्राणाः उत्क्रान्ताः सपद्येव विष्णुपार्षदाः स्नानपुण्यात् तीर्थसेवया च तं ब्राह्मणं विष्णुपदं प्रापयामासुः। अतः ब्राह्मणेन धर्ममार्गाः आचरणीयाः।[5]

जीर्यन्ति जीर्यतः केशा दन्ता जीर्यन्ति जीर्यतः।
जीविताशा धनाशा च जीर्यतोऽपि न जीर्यति।।
चक्षुः श्रोत्राणि जीर्यन्ति तृष्णैका तरुणायते।
सूच्या सूत्रं यथा वस्त्रे संसूचयति सूचिकः।।

---

1. श्रीमद्भागवतमहापुराण 4/4/27
2. श्रीमद्देवीभागवत महापुराण 5/1/28
3. श्रीमद्देवीभागवत महापुराण 5/1/29
4. व्याघ्रपाद स्मृति 371
5. पद्मपुराण उत्तर खण्ड 238

तद्‍वत् संसारसूत्रं हि तृष्णा सूच्योपनीयते।
यथा श्रृंगं रुरोः काये वर्धमाने च वर्धते॥
तथैव तृष्णा वित्तेन वर्धमानेन वर्धते।
अनन्तपारा दुष्पूरा तृष्णा दोषशतावहा॥
अधर्मबहुला चैव तस्मात् तां परिवर्जयेत्॥[1]

सम्प्रति भोगाकुला संस्कृतिः विश्वस्मिन् जीवन नाशाय प्रवर्तते। तस्याः प्रभावातः नदीपर्वतसरःकाननादिप्रकृतेर्दोहनाधिक्यात् प्रदूषणाच्च तीर्थानां तीर्थत्वं क्षीयते। भारतभूमौ कृष्णद्‍वैपायनो व्यासः द्वापरैव आज्ञापितवान् पृथिविशैय्यापटम् उपबर्हं हस्ताञ्जलिपात्रं वृक्षपत्राणि वस्त्रं भवितुं शक्नुवन्ति। यथोक्तं श्रीमद्‍भागवते–

सत्यांक्षितौ किं कशिपोः प्रयासैः
बाहौ स्वसिद्धेह्युपबर्हणैः किम्।
सत्यञ्जलौ किं पुरुधान्नपात्र्या
दिग्वल्कलादौ सति किं दुकुले॥[2]
चीराणि किं न पथि न सन्ति दिशन्ति भिक्षां
नैवाङ्घ्रिपाः परभृतः सरितोऽप्यशुष्यन्
रुद्धा गुहाः किमजितोऽवति नोपसन्नान्
कस्माद् भजन्ति कवयो धनदुर्मदान्धान्॥[3]

अत्र साधूनां वृक्षाणाञ्च जीवनं लोकहिताय सरितां जलप्रवाहः जीवसुखाय गुहानामाकाशः निवासाय आवाहनं कुर्वन्तु। भागवते चतुर्थे स्कन्धे ध्रुवः भगवत्प्राप्तेरनन्तरं परितप्यमानाः सन्ति अचिकथत्–

अहो बत महानात्म्यं मन्दभाग्यस्य पश्यत।
भवच्छिदः पादमूलं गत्वा याचे यदन्तवत्॥[4]

पावनेयं भारतभूमिः प्रकृतिसौन्दर्याः पुण्यदेशान्विता। अत्र प्रकृतिरम्याः सात्त्विको यौवनोन्मेषः दृग्गोचरी भवति, यत्र लोकोत्तराध्यात्मं पुष्पायते। भारतवर्षे शुद्धभूमौ आत्मतत्त्वम् अत्रैव मूर्तायते भारतस्य तत्वाराधिनि वैश्विकधर्माणां कृते मानवता सन्देशः चन्दनायते। अत्र परब्रह्मणः सौन्दर्यं प्रतिपदमालोक्यते, अत्र तीर्थेषु पितृचरणाः पुण्यायन्ते। यथा पुण्डरीकसेवया अत्र इत्येषु स्त्रीपुंसुधर्माचरणात्

1. पद्मपुराण सृष्टि खण्ड 19/254 से 258 तक।
2. श्रीमद्‍भागवतमहापुराण2/2/4
3. श्रीमद्‍भागवतमहापुराण2/2/5
4. श्रीमद्‍भागवतमहापुराण4/9/31

कोटि–कोटितीर्थानि रचयन्ति। सीतादिसतीनां महिमा उपनिषत्सु गीयते–

पुरुषाणां सहस्रं च सती स्त्री हि समुद्धरेत्।
पतिपतिव्रतानां च मुच्यते सर्वपातकात्।।
नास्ति तेषां कर्मभोगः सतीनां व्रततेजसा।
तथा सार्द्धं च निष्कर्मी मोदते हरिमन्दिरे।।[1]

राधाकृष्णयोः मधुरातिमधुरः प्रेमरसः तीर्थायते। भगवतः श्रीकृष्णस्य चरितं यत्र यत्र जातं तच्छर्वं तीर्थमेव। यथोक्तं हरिवंशे–

नन्दगोपसुतश्चैव देवानां विजयावहा।
चीरवासाः सुवासाश्च रौद्री संध्याचरी निशा।।[2]
यशोदापि समाधत्त गर्भं तदहरेव तु।
विष्णोः शरीरजां निद्रां विष्णुनिर्देशकारिणीम्।।[3]
गर्भकालेत्वसम्पूर्णे अष्टमे मासि ते स्त्रियौ।
देवकी च यशोदा च सुषुवाते समं तदा।।[4]
हारशोभितसर्वाङ्गी मुकुटोज्जवलभूषिता।
कन्यैव सा भवन्नित्यं दिव्या देवैरभिष्टुता।।[5]
नीलपीताम्बरधरा गजकुम्भोपमस्तनी।
रथविस्तीर्ण जघना चन्द्रवक्त्रा चतुर्भुजा।।[6]
विद्युद्विस्पष्टवर्णाभा बालार्क सदृशेक्षणा।
पयोध्रस्तनवती संध्येव सपयोधरा।।[7]

द्वापरे कालिन्द्यास्तटे जीवब्राह्मणो ऐक्यप्रतिपादिनी रासलीला सञ्जाता तत् स्थलं महातीर्थमिति। भागवते कथितम् –

---

1. स्कन्दपुराण
2. हरिवंशपुराण विष्णुपर्व अ03/11
3. हरिवंशपुराण विष्णुपर्व अ04/10
4. हरिवंशपुराण विष्णुपर्व अ04/11
5. हरिवंशपुराण विष्णुपर्व अ04/38
6. हरिवंशपुराण विष्णुपर्व अ04/39
7. हरिवंशपुराण विष्णुपर्व अ04/40

पतिसुतान्वयभ्रातृबान्धवानतिविलङ्घ्य तेऽन्त्यच्युतागताः।
गतिविदस्तवोद्गीतमोहिताः कितवयोषितः कस्त्यजेन्निशि॥[1]
रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डिमतः।
योगेष्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः।
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः॥[2]
एवं परिष्वङ्गकराविमर्श:-
स्निग्धेक्षणोद्दामविलासहासैः।
रेमे रमेशो व्रजसुन्दरीभि-
र्यथार्भकः स्वप्रतिबिम्बविभ्रमः॥[3]
तदङ्गसङ्गप्रमुदाकुलेन्द्रियाः।
केशान्दुकूलं कुचपट्टिकां वा।
नाञ्जः प्रतिव्योढुमलं व्रजस्त्रियो
विस्रस्तमालाभरणाः कुरुद्वह॥[4]

कृष्णः यदा ब्रजमण्डलं त्यक्त्वा मथुरार्थं प्रयातः तदानीं आर्त्ताः गोप्यः स्वाश्रुपूरैः ब्रजं तीर्थी चक्रुः।

गोप्यस्तास्तदुपश्रुत्य बभूवुर्व्यथिता भृशम्।
रामकृष्णौ पुरीं नेतुमक्रूरं व्रजमागतम्॥[5]
काश्चिळात्कृत हृतापश्वासम्लानमुखश्रियः।
स्रंसद्दुकूलवलयकेशग्रन्थश्च काश्चन॥[6]
अहो विधातस्तव न क्वचिद्दया
संयोज्यमैत्रया प्रणयेन देहिनः।
तातांश्चाकृतार्थन् वियुजङ्क्ष्ययार्थकं
विक्रीडितं तेऽर्भकचेन्दितं यथा॥[7]

1. श्रीमद्भागवतमहापुराण10/32/16
2. श्रीमद्भागवतमहापुराण10/33/3
3. श्रीमद्भागवतमहापुराण10/33/
4. श्रीमद्भागवतमहापुराण10/33/18
5. श्रीमद्भागवतमहापुराण10/39/13
6. श्रीमद्भागवतमहापुराण10/39/14
7. श्रीमद्भागवतमहापुराण10/39/19

निवारयामः समुपेत्य माध्वं
किं नोऽकारिष्यन् कुलवृद्धबान्ध्वाः।
मकुन्दसङ्गान्निमिषार्ध्दुस्त्यजाद्
दैवेन विध्वंसितदीनचेतसाम्।।[1]
यस्यानुरागललितस्मितवल्गुमन्त्र-
लीलावलोकपरिरम्भणरासगोष्ठ्याम् ।
नीताः स्म नः क्षणमिव क्षणदाविना तं
गोप्यः कथं न्वततिरेमतमो दुरन्तम्।।[2]
योऽह्नः क्षये व्रजमनन्तसखः परीतो
गोपैर्विशन् खुररजुश्छुरितालकस्रक्।
वेणुं कृणन् स्मितकटाक्षनिरीक्षणेन
चित्तं क्षिणोत्यमुमृते नु कथं भवेम।।[3]
एवं ब्रुवाणा विरहातुराभृशं
व्रजस्त्रियः कृष्णतिसक्तमानसा।
विसृज्य लज्जां रुरुदुःस्म सुस्वरं
गोविन्द दामोदर माध्वेति।।[4]

एतादृशि महिमाष्शालिनी तीर्थे निवासाय उद्धवसदृशाः ब्रह्मज्ञानिनः प्रार्थयन्ति श्रीहरिम्-

आसामहो चरणरेणु जुषामहस्यां
वृन्दावने किमपि गुल्मलतोषधिनाम्।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्तिमृग्याम्।।[5]
या वै श्रियार्चितमजाभिराप्तकामै-
र्योगेष्वरैरपि पदात्मनि रासगोष्ठ्याम्।

---

1. श्रीमद्भागवतमहापुराण10/39/28
2. श्रीमद्भागवतमहापुराण10/39/29
3. श्रीमद्भागवतमहापुराण10/39/30
4. श्रीमद्भागवतमहापुराण10/39/31
5. श्रीमद्भागवतमहापुराण10/47/61

कृष्णस्य तद् भगवतश्चरणारविन्दम्
न्यस्तं स्तनेषु विजुहः परिरभ्य तापम्।।[1]
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णश।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम्।।[2]

उद्धवस्य इमामेव प्रार्थनां हिन्दीसाहित्यस्य प्रसिद्धः कविः रत्नाकरः इत्थं करोति–

छावते कुटीर कहुँ रम्य जमुना के तीर
गौन रौन–रेती सों कदापि करते नहीं।
कहैं रतनाकर विहाइ प्रेम–गाथा गूढ़
स्रौन रसना मैं रस और भरते नहि।।
गोपि ग्वाल बालनि के उमडत आँसू देखि
लेखि प्रलयागम हूँ नैकु डरते नही
होतो चित चाव जौ न रावरे चितावन को
तजि व्रज–गाँव इतै पाँव धरते नहीं।।[3]

वस्तुतः तीर्थशब्दः कश्चन महद्भावानां समूहः यत्र प्रतिपदं पुण्यार्जनस्य भावना निहता वर्तते, सा पुण्यभावना कस्यापि भगवदवतारादुत्पन्ना भवेदथवा कस्यापि महापुरुषस्य तपसोद्भूता स्यादथवा नदीनां संगमात् तत्र प्रकृतिसौन्दर्यं स्यात्, तत्र भक्तिसौन्दर्यं स्यात्, तत्र धर्मसौन्दर्यं स्यात्, पराक्रमसौन्दर्यं स्यात्, सर्वत्र तीर्थत्वं सेवनीयं भवति।

तीर्थस्य इयं भारतीया परिभाषा यदि मानवसमाजे सुष्ठु गृहीता स्यात् तर्हि धरेयं स्वर्गतामुपैष्यति।।

---

1. श्रीमद्भागवतमहापुराण10/47/62
2. श्रीमद्भागवतमहापुराण10/47/63
3. उद्धवशतक (रत्नाकर)

पुष्पिकाया औचित्यसमीक्षणम्

डॉ. ज्ञानधरपाठकः

पुष्पिकाशब्दस्य कः अर्थः कुत्र चास्य प्रयोगो विद्यते। पुष्पेन पुष्पिकाशब्दस्य निर्माणम्भवति। अस्य प्रयोगः पाण्डुग्रन्थेषु प्राप्यते। कस्यापि कार्यस्य निर्विघ्नता-पूर्वक-परिसमाप्त्यर्थं मंगलाचरणम्भवति। गणेशादीष्टदेवानां स्मरणं नमस्कार इत्यस्माकं परम्परा। तत्तु मंगलाचरणं त्रिविधं स्थानत्रयञ्च भवति- आशीर्नमस्क्रिया वस्तुनिर्देशो वापि तन्मुखम्।[1] कार्यस्य ग्रन्थस्य वा प्रारम्भे, मध्ये चान्ते मंगलाचरणं भवति। प्रायः सर्वेषु ग्रन्थेषु प्रारम्भे पद्यरूपे मंगलाचरणं विद्यते, मध्ये चान्ते क्वचित्क्वचित्। मंगलस्वरूपे स्वस्तिक-कलश-नारिकेल-पुष्पादिस्वरूपचिह्नानि मिलन्ति। ग्रन्थान्ते प्रायः एतेषां चिह्नानां प्रयोगः प्राप्यते, तेषु विशेषतः पुष्पस्वरूपचिह्नं दृश्यते। येन ज्ञायते यद् अत्रैव ग्रन्थः परिपूर्णः। ग्रन्थकारः स्वविषये मंगलाचरणे विज्ञापनं करोति, लिपिकारः स्वविज्ञापनं कुत्र करिष्यति ? इत्यस्योत्तरमस्ति ग्रन्थान्ते यत्र पुष्पस्वरूपम्मंगलचिह्नं विद्यते तत्र लिपिकारः स्वविज्ञापनं करोति स्म। लिपिकारः स्वाभिधानं लेखनकालादि सर्वं पुष्पिकायां ददाति स्म। यदा भगवान् पितामहः ब्रह्मा सृष्टेः निर्माणं कृतवान् तस्मिन्नेव काले लिपेरपि। ब्रह्मणा निर्मिता लिपिः ब्राह्मीत्यभिधीयते। जैनपरम्परायामपि तादृशीं भावनां पश्यामः, भगवान् ऋषभदेवः स्वपुत्र्यै लिपेः ज्ञानं प्रारम्भकाले प्रदत्तवान् आसीत्। महर्षिः पाणिनिः लिखति-

त्रिषष्टिश्चतुःषष्टिर्वा वर्णाः शम्भुमते मता।
प्राकृते संस्कृते चापि स्वयं प्रोक्ताः स्वयंभुवा॥[2]

आदिकाव्ये रामायणे सुन्दरकाण्डे रामनामाङ्कितमङ्गुलीयकं मुद्रिकेति यस्योपरि राम इति नाम लिखितमासीत्-

वानरोऽहं महाभागो दूतो रामस्य धीमतः।
रामनामाङ्कितं चेदं पश्य देव्यङ्गुलीयकम्॥[3]

रामायणादिग्रन्थेषु प्राप्तलेखनोद्धरणान्याधृत्य वक्तुं शक्यते यद् भारते देशे लेखनकला

---

1. काव्यप्रकाशे 1/2
2. पाणिनीयशिक्षा-3
3. वाल्मीकीयरामायणं सुन्दरकाण्डम् 36/2

बहुपूर्वकालादेव विद्यते। श्रौतीपराम्परावशाज्जनाः लेखने अविश्वस्ताः आसन्। श्रौतीपराम्परावैशिष्ट्यं पाणिनीयशिक्षायामपि वर्णितम्-

गीती शीघ्री शिरःकम्पी तथालिखितपाठकः।
अनर्थज्ञोऽल्पकण्ठश्च षडेते पाठकाधमाः॥[1]

इयं धारणा आसीत् यत् कण्ठस्थाः विद्याः सर्वाः विद्याः। अस्मिन् विषये प्रसिद्धं पद्यं विद्यते-

पुस्तकेषु च या विद्या परहस्तगतं धनम्।
कार्यकाले समुत्पन्ने न सा विद्या न तद्धनम्॥

वस्तुतः भारते ऋतुपरिवर्तनवशात् वैदेशिकाक्रमणवशाच्च कर्गद-भूर्जपत्र-ताडपत्रादीनामुपरि अतिप्राक्कालिकलिखितसामग्रीं नैव प्राप्नुमः। तथापि उत्खननकार्ये अतिप्राचीनं लिखितवर्णस्वरूपं लिखितां सामग्रीञ्चेदानीमपि प्राप्नुमः। अवान्तरकाले स्मरणशक्तिन्यूनतावशाद् भारतवर्षे अपि आचार्याः ग्रन्थलेखने संलग्ना अभूवन्। तस्मिन्काले गुरुकुले एक एव गुरुरासीत् छात्रास्तु बहवः आसन्, तस्मात् कारणात् अध्ययने अध्यापने च सौविध्याय ग्रन्थस्य प्रतयः अपेक्षिता आसन् **''आवश्यकता आविष्कारस्य जननी''** इति वचनमनुसृत्य पाठ्यग्रन्थानां प्रतयः निर्मिताः। केचन आचार्याः ग्रन्थस्य लेखनं स्वयमेव कृतवन्तः केचन समयाभावात् लेखनकर्मणि अक्षरविन्यासस्य स्पष्टताभावाद् वा लेखनकार्यं लेखकेन कायस्थेन कारयन्ति स्म। केचन च आचार्याः वदन्ति स्म छात्राश्च लिखन्ति स्म विभिन्नैः छात्रलेखनैः हस्तलिखितग्रन्थेषु विभिन्नाः त्रुटयः सञ्जाताः। शुद्धः पाठः अस्ति नास्ति वेति धनं गृहीत्वा ये ग्रन्थस्य प्रतयः कुर्वन्ति ते न जानन्ति। यतो हि लेखकः ग्रन्थकर्त्ता नास्ति न सम्बद्धविषयस्य तस्य पार्श्वे ज्ञानं वर्तते। यथा इदानीं संगणकमाध्यमेन यः टंकणं अर्थात् लेखनं करोति सः तं विषयं न जानाति केवलं वर्णविन्यासं आकृतिं दृष्ट्वा टंकणं करोति। केचन एतादृशाः अपि सन्ति ये विषयवस्त्वपि जानन्ति। कथनस्य अभिप्रायः अस्ति यत् ग्रन्थकर्त्ता भिन्नः ग्रन्थलेखकश्च भिन्नः। लेखकाय लेखकः, लिपिकारः, दिविरः, करणः, कर्णिन्, शासनिन्, धर्मलेखिन्, कायस्थः प्रभृतयः शब्दाः प्राप्यन्ते।[2] ग्रन्थलेखकाः विषयस्य अज्ञानात् त्रुटीः कुर्वन्ति।

पुष्पिकाया आवश्यकता

ग्रन्थकर्त्ता यत् कथयति तत् श्रुत्वा अथवा पूर्वलिखितं ग्रन्थं दृष्ट्वा लिपिकः तस्य ग्रन्थस्य प्रतीः करोति। ग्रन्थे लेखकविषये नास्त्यवकाशः यतो हि ग्रन्थस्य तु पूर्वं निर्मितः तस्मात् कारणात् ग्रन्थान्ते लेखकः स्वविषये लिखति। प्रायः ग्रन्थकर्ता ग्रन्थे स्वपरिचयं न ददाति पुष्पिकायां लेखकः ग्रन्थकर्तुः परिचयं ग्रन्थनिर्माणकालं राज्याश्रयं च प्रतिपादयति। ग्रन्थकालविषये प्रायः ज्ञानं पुष्पिकामाध्यमेन

---

1. पाणिनीयशिक्षा-32
2. पाण्डुलिपिविज्ञान-डॉ. सत्येन्द्रदूबे पृ.सं. 26

प्राप्यते।

यद्यपि परकृतीनां निष्ठापूर्वकं प्रतिलिपिकरणमेव लेखकानामेको धर्मः, तथापि तादृशं स्वधर्मलेखनकर्म सुष्ठु सम्पादयन्तो यदा कदाचित् स्वमनोभिप्रायप्रकाशकानि वचांसि यथावसरं यत्र तत्र ग्रन्थपुष्पिकादिषु साधु सन्निवेशयन्ति। तेषामेतासूक्तिषु लेखकस्वरूपविषये अनेकानि चित्राण्याविर्भावयन्तीव, लेखकस्वरूपञ्च प्रत्यक्षतामापादयन्ति।

पुष्पिकायास्स्वरूपम्

1. इति श्रीभगवद्रामानुजाचार्यविरचिते वेदांतदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः 4 समाप्तोध्यायः।। संवत् 1789 अश्वन शुक्लपूर्णिमां 24 कुजवासरे लिषतं श्री दियाल शर्मणेन पठनार्थम् श्रीमन्नारायणदासस्य शुभंभवः नग्रलाडवामधो लिखितं।[1]

2. इति श्रीमद्वत्सकलतिलक वरदाचार्यसूनुनासौम्योपेयतृसूरिणा-विरचितायामष्टश्लोकी व्याख्यायां चरमश्लोकाधिकारस्तृतीयः समाप्तोयं ग्रंथ रदौरे यमुनाक्षेत्रे रामनारायणाख्यब्रह्मणेन लिपिकृतं इदं ग्रन्थं स्वीय कार्यार्थे संवत् 1886 मासफालगुणाशुदि 12 वार शनिश्चरशुभमस्तु।[2]

3. इति श्रीभगवत्सनत्कुमार संतति प्रवर्तक।। श्रीभगवन्नियमानन्दपादसरोजाश्रितानुगकास्मीरी श्री केशवभट्ट चरणारविन्दानुगेतानंताभिधेयेन विरचिता वेदांत रत्नमाला समाप्ता। वैशाखस्य कृष्णपक्षे त्रयोदश्यां गुरो दिने रामनारायणेनेयं लेखी रत्नमालिका। शुभमस्तु मंगलं भवतु।[3]

पुष्पिकायां प्रायः लिपिकः लिखति कस्य शासनकाले कस्य प्रशस्तौ च कस्मिन्वर्षे निर्मितोयं ग्रन्थः।

लिपिकस्य प्रकारः

व्यवहाराध्याये लेख्यप्रकरणे याज्ञवल्क्यस्मृतौ लेख्यं द्विविधं प्रोक्तं शासनं जानपदं चेति। तच्च द्विविधम्- स्वहस्तकृतं परहस्तकृतं चेति।

यः कश्चिदर्थो निष्णातः स्वरुच्या तु परस्परम्।
लेख्यं तु साक्षिमत्कार्यं तस्मिन्धनिकपूर्वकम्।।[4]

यथाह नारदः

लेख्यं तु द्विविधं ज्ञेयं स्वहस्ताऽन्यकृतं तथा।

1. विशदपाण्डुग्रन्थसूची पृ.सं. 3
2. विशदपाण्डुग्रन्थसूची पृ.सं. 4
3. विशदपाण्डुग्रन्थसूची पृ.सं. 25
4. याज्ञवल्क्यस्मृतिः 1/84
5. याज्ञवल्क्यस्मृतिः पृ.सं. 191

असाक्षिमत्साक्षिमच्च सिद्धिर्देशस्थितेस्तयोः।।[5]

1. स्वयं ग्रन्थकारः ग्रन्थलेखनं करोति।
2. आचार्यः व्याख्यानं करोति छात्राश्च श्रुत्वा लिखन्ति।
3. आचार्यः व्याख्यानं करोति कायस्थाः (व्यावसायिकलेखकाः)श्रुत्वा लिखन्ति।
4. पूर्वप्रतिं दृष्ट्वा प्रतिलिपिकार्यं कायस्थः करोति।
5. अन्ये सामान्यजनाः धर्मभावनावशात् ग्रन्थस्य प्रतिलिपिं कृत्वा दानं कुर्वन्ति।

लिपिं करोति लेखनं करोति यः सः भवति लेखकः। सः लेखकः नैकविधः तत्र- प्रथमः आचार्यः विषयविशेषज्ञः कदाचित्स्वयं ग्रन्थरचनां करोति लेखनमपि करोति च। द्वितीयः आचार्यः ग्रन्थरचनां करोति परन्तु लेखनं न करोति सः जीविकासञ्चालनाय ये जनाः लेखनकर्मणि संलग्नास्सन्ति तेषां माध्यमेन ग्रन्थलेखनं कारयति। कदाचिच्च स्वयं ग्रन्थस्योच्चारणं करोति तंच्च श्रुत्वा छात्राः लिपिको वा लिपिकार्यं कुर्वन्ति। कदाचित् लिखितग्रन्थस्य प्रतिलिपिं करोति। 'विद्वानेव विजानाति विद्वज्जनकृतश्रमम्' इत्युक्त्या वयमनुभवामः लेखने कियत् कष्टं भवति।

लेखकः मातृकालेखने जातं कष्टं प्रकाशयति-

भुग्नपृष्ठकटिग्रीवः तुल्यदृष्टिरधोमुखः।
कष्टेन लिखितं ग्रन्थं यत्नतः परिपालयेत्।।[1]

अर्थात् एतादृशः ग्रन्थः यत्कष्टेन लिखितः तत् यत्नेन संरक्षणीयः।

लेखने गुणात्मकता-

नातिकृशैर्नातिदीर्घह्रस्वदीर्घादिलक्षितैः।
सम्पूर्णावयवैर्मात्रा बिन्दुसंयोगलक्षितैः।।[2]

यादृशं पुस्तके दृष्टं तादृशं लिखितं मया।
अबद्धं वा सुबद्धं वा मम दोषो न विद्यते।।[3]

दृष्ट्वा लेखं यथातत्त्वं ततः प्रत्यनुभाष्य च।
प्रतिलेखो भवेत् कार्यो यथा राजवचस्तथा।।[4]

---

1. दर्शपूर्णमासग्रन्थानी
2. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 110
3. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 114
4. अर्थशास्त्रम् 2.10.45

यत्र अतिकृशत्वं नास्ति, ह्रस्वदीर्घादियुक्तोऽपि नास्ति, मात्रादियुक्तोऽपि विद्यते। तदेव लेखकस्य गुणात्मकत्वं साधयति।

लेखकस्य वैशिष्ट्यम्-

सर्वदेशाक्षराभिज्ञः सर्वशास्त्रविशारदः।

लेखकः कथितो राज्ञः सर्वाधिकरणेषु वै।।[1]

शीर्षोपेतान् सुसम्पूर्णान् शुभश्रेणीगतान् समान्।
अक्षरान् वै लिखेद्यस्तु लेखकः स वरः स्मृतः।।[2]

उपायः वाक्यकुशलः सर्वशास्त्रविशारदः।

बह्वर्थवक्ता चाल्पेन लेखकः स्यान्नृपोत्तम।।

वाद्यभिप्रायतत्त्वज्ञो देशकालविभागवित्।

अनाहार्यो नृपो भक्तो लेखकः स्यान्नृपोत्तम।।[3]

प्रज्ञापनाज्ञापरिदानलेखास्तथा परिहारनिसृष्टिलेखौ।
प्रवृत्तिकश्च प्रतिलेख एव सर्वत्रगष्टोति हि शासनानि।।[4]

अनेन विज्ञापितमेवमाह तद्दीयतां चेद्यदि तत्त्वमस्ति।
राज्ञः समीपे वरकारमाह प्रज्ञापनैषा विविधोपदिष्टाः।।[5]

भर्तुराज्ञा भवेद्यत्र निग्रहानुग्रहौ प्रति।
विशेषेण तु भृत्येषु तदाज्ञालेखलक्षणम्।।[6]

यथार्हगुणसंयुक्ता पूजा यत्रोपलक्ष्यते।
अप्याधौ परिदाने या भवतस्तावुपग्रहौ।।[7]

जातेर्विशेषेषु पुरेषु चैव ग्रामेषु देशेषु न तेषु तेषु।
अनुग्रहो यो नृपतेर्निदेशात् तज्ज्ञः परिहार इति व्यवस्येत्।।[8]

निसृष्टिस्थापना कार्यकरणे वाचने तथा।
एष वाचिकलेखः स्याद् भवेन्नैसृष्टिकोऽपि वा।।[9]

1-2. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 110

3. मत्स्यपुराण 189

4-9 अर्थशास्त्रम् 2.10.38-43

विविधां दैवसंयुक्तां तत्त्वजा चैव मानुषीम्
द्विविधां तां व्यवस्यन्ति प्रवृत्तिं शासनं प्रति॥[1]

यत्रेश्वरांश्चाधिकृतांश्च राजा रक्षोपकारौ पथिकार्थमाह।
सर्वत्रगो नाम भवेत्स मार्गे देशे च सर्वत्र च वेदितव्यः॥[2]

मेधावी वाक्पटुः प्राज्ञः सत्यवादी जितेन्द्रियः।
सर्वशास्त्रसमालोकी ह्येषः साधुः स लेखकः॥[3]

सकृदुक्तगृहीतार्थो लघुहस्तो जिताक्षरः।
सर्वशास्त्रसमालोकी प्रकृष्टो नाम लेखकः॥[4]

तथा सम्पूजयेद् वत्स लेखकं शास्त्रपारगम्।
छन्दोलक्षणतत्त्वज्ञं सत्कविं मधुरस्वरम्॥

प्रणष्टं समरति ग्रन्थं श्रेष्ठं पुस्तकलेखकम्।[5]

जातिं कुलं स्थानवयः श्रुतानि कमार्द्धिशीलान्यथ देशकालौ।
यौनानुबन्धं च समीक्ष्य कार्ये लेखं विदध्यात् पुरुषानुरूपम्॥[6]

निन्दा प्रशंसा पृच्छा च तथाख्यानमथार्थना
प्रत्याख्यानमुपलम्भः प्रतिषेधोऽथ चोदना।
सान्त्वमभ्युपपत्तिश्च भर्त्सनानुनयौ तथा
एतेष्वर्थाः प्रवर्तन्ते त्रयोदशसु लेखजाः॥[7]

पुस्तकलेखकः स्वासामर्थ्यं विनयं वा प्रकटीकरोति-

अक्षरं यत्परिभ्रष्टं मात्राहीनं तु यद् भवेत्।
क्षन्तमर्हन्ति विद्वांस क्षमा हि विदुषां धनम्॥[8]

ग्रन्थलेखने यत्र कुत्रापि स्खलनं जातं तत्र शुद्धं कृत्वा भवन्तः पठन्तु। रोषं मा कुर्वन्तु क्षमा एव विदुषां धनमस्ति। यादृशं दृष्टं श्रुतं वा तादृशं लिखितं कथनस्यायमेवाभिप्रायः यदि अवस्थावाध

1. अर्थशास्त्रम् 2.10.44
2. अर्थशास्त्रम् 2.10.46
3. गरुडपुराणे
4-5. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 111
6. अर्थशास्त्रम् 2.9.5
7. अर्थशास्त्रम् 2.10.23-24
8. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 112

क्यात् इन्द्रियासामर्थ्याद् उत वा व्याख्याने पूर्वग्रन्थे दोषाद् अस्यां कृतौ दोषः वर्तते मद्दोषः नास्ति।

पुस्तकेऽस्मिन् बुधा यूयं न्यूनाधिक्यादिलक्षणम्।
दृष्ट्वा मयि कृपादृष्ट्या क्षमां कुरुत सज्जनाः॥

पुस्तके लिखितं यादृक् तादृशं लिखितं मया।
तथापि यो मे व्यत्यासो लेखने क्रियतां क्षमा॥[1]

कदाचिदन्यमनस्कस्थितिवशात् लेखने दोषः अजायत तर्हि भवन्तः शुद्धं कृत्वा पठन्तु मत्कृते क्षमां कुर्वन्तु च।

अदृश्यदोषान् मतिविभ्रमाद् वा यत्किंचिदूनं लिखितं मया च।
तत् सर्वमार्यैः परिशोधनीयं कोपं न कुर्यात् खलु लेखकस्य॥[2]

विसर्गेषु वर्णेषु मात्रासु स्पष्टावनुस्वारसंयोगदैर्घ्येषु यद्यत्।
प्रणष्टं प्रमादेन हस्तस्य दोषात् समालोक्य सर्वं सहन्तां महान्तः॥[3]

अविरलकृतवर्णभ्रेषणं पुस्तकेऽस्मिन् रचितमनावसाने लेखनीदूषणं वा।
अनुचितमथवा यद् वक्रतो वर्णराशेः करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥[4]

यदि हृदयनिवेगाल्लेखनीभ्रान्तिभावात्
नयनचलनसंगात् श्रौतशब्दावलम्बात्।
लिखितमकृतबुद्ध्या यन्मया पुस्तकेऽस्मिन्
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥[5]

सरभसकरवेगभ्रष्टवर्णादिदोषैः
यदिह भवतु वाच्यं पुस्तके तत्समस्तम्।
प्रशमितपरदोषा वीक्ष्य पौराणिकास्ते
करकृतमपराधं क्षन्तुमर्हन्ति सन्तः॥[6]

दीर्घबिन्दुविसर्गाणामक्षराणां च विस्मृतिः।
यद्यस्ति दृष्ट्वा दयया क्षन्तुमर्हथ सज्जनाः॥[7]

विसर्गबिन्दुमात्राणि पदपादाक्षराणि च।
न्यूनानि चातिरिक्तानि क्षमस्व पुरुषोत्तम॥[8]

ग्रन्थस्य रक्षणाय प्रार्थनां करोति लेखकः-

जलाद् रक्षेत् स्थलाद् रक्षेत् रक्षेत् शिथिलबन्धनात्।
मूर्खहस्ते न दातव्या एवं वदति पुस्तिका॥

1-8. न्यू लाइट्स आफ मैन्यूस्क्रिप्टोलाजी पृ. सं. 112-114

अग्ने रक्षेत् जलाद् रक्षेत् मूषकेभ्यो विशेषतः।
कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत्॥

उदकानिलचौरेभ्यो मूषकेभ्यो हुताशनात्।
कष्टेन लिखितं शास्त्रं यत्नेन परिपालयेत्॥[1]

तैलाद् रक्षेत् जलाद् रक्षेत् रक्षेत् श्लथबन्धनात्।
मूर्खहस्ते न दातव्यम् एवं वदति पुस्तकम्॥

सम्भूष्यं सदपत्यवत् परकराद्रक्ष्यं वीक्ष्यं च सुक्षेत्रवत्
संशोध्यं व्रणितांगवत् प्रतिदिनं वीक्ष्यं च सन्मित्रवत्।
बध्यं बध्यवदश्लथं दृढगुणैः स्मर्य च हरेनामवत्
नैवं सीदति पुस्तकं खलु कदाप्येतद् गुरूणां वचः॥

अपरिचिते त्वालेख्ये चपलधिया यन्मयात्र दुर्लिखितम्।
तत्तत्करुणाम्भोधे मातः क्षन्तव्यमखिलवागधिपे॥

यदि कश्चिज्जनः ग्रन्थस्य चौरकार्य करोति तर्हि तस्मै शापं ददाति लेखकः। यतो हि ग्रन्थलेखने अतीव कष्टम्भवति। तस्मात् कारणाद् ग्रन्थे तस्य सर्वाधिकारः वर्तते। ग्रन्थः पुत्रवद् भवति। साम्प्रतिके कालेऽपि ग्रन्थलेखकाय ग्रन्थविक्रये जाते धनं मिलति।

अर्जितं भूरि कष्टेन पुस्तकं लिखितं मया।
हर्तुमिच्छति यः पापी तस्य वंशक्षयो भवेत्॥

कायस्थलेखकाय दोषे सति दण्डव्यवस्था–

लेखकश्चेद् उक्तं न लिखति, अनुक्तं लिखति, दुरुक्तमुपलिखति, सूक्तमुल्लिखति, अर्थोत्पत्तिं वा विकल्पयति, इति पूर्वमस्मै साहसदण्डं कुर्याद्, यथापराधं वा।[2]

अपि पंचशतं दण्ड्यान् दण्डयेत् पृथिवीपतिः।
अभावे पंच कायस्थान् एकं वा स्वर्णकारकम्॥[3]

पुष्पिकायाः पाण्डुग्रन्थकालनिर्धारणे ग्रन्थकारस्य कालनिर्धारणे च महत्त्वपूर्णं स्थानं विद्यते। इति शम्।

---

1. पाण्डुलिपि विज्ञान 34
2. अर्थशास्त्रम् 4.9.17
3. न्यू लाइट्स आफ मैन्यूस्किप्टोलाजी पृ. सं. 116

विश्वेश्वरनाथज्योतिर्लिङ्गस्य तन्त्रदृष्ट्या वास्तुशास्त्रीयं विश्लेषणम्

डॉ. आशीषकुमारचौधरी

1.1 भौगोलिकदृष्ट्या निरूणम्

वाराणस्यां नदी पुण्या सिद्धगन्धर्वसेविता। श्रीविश्वेश्वरज्योतिर्लिङ्गमुत्तरप्रदेशस्य वाराणसीजनपदस्य काशीनगरेऽवस्थितमस्ति। वाराणसीनगरमर्धचन्द्राकाररूपेण गङ्गायाः वामतटे 25°/18° उत्तराक्षांशे 83° 10' पूर्वदेशान्तरेऽवस्थितमस्ति।[1] मत्स्यपुराणानुसारं तदिदं क्षेत्रं पश्चिमभागे सार्धद्वियोजनपर्यन्तं विस्तृतमासीत्, दक्षिणस्यान्त्विदं क्षेत्रं वारणातः गङ्गां यावदर्धयोजनं यावद्व्यापृतमस्ति।[2] मत्स्यपुराणे अन्यत्र अस्य भौगोलिकस्वरूपं प्रतिपादयता बोधितं यत् प्राचीतः प्रतीचीं यावत् अस्य क्षेत्रस्य विस्तारः योजनद्वयमासीत्, अर्वाच्याम् अर्धयोजनमासीदिति।[3] नगरं भीष्मचण्डीतः पर्वतेश्वरं यावद् व्यापृतमासीत्। ब्रह्मपुराणानुसारं अस्य क्षेत्रस्य प्रमाणं पञ्चक्रोशमासीत्तत्र उत्तरवाहिनी गङ्गा आसीत्।[4] यस्मात् क्षेत्रस्य महिमा वर्धितः। उत्तरस्यां गङ्गा नगरेण सह योजनद्वयं प्रवहति स्म। स्कन्दपुराणानुसारं क्षेत्रं परितः विस्तृतं क्रोशचतुष्टयमासीत्।[5] लिङ्गपुराणविवरणमनुसृत्य अस्य क्षेत्रस्य इतोऽप्यधिक-विस्तारः प्रतिपाद्यते।[6] पुराणस्यास्यानुसारं कृत्तिवासादारभ्य क्षेत्रमिदं चतुर्षु दिक्षु विस्तृतमस्ति। तन्मध्ये मध्यमेश्वरनामकं स्वयम्भूलिङ्गमवर्तत। इतोऽपि प्रतिक्रोशं चतुर्षु दिक्षु क्षेत्रस्य विस्तारः अस्ति। इयमेव वाराणस्याः वास्तविकी सीमा वर्तते। अग्निपुराणानुसारं वरुणास्योः मध्ये स्थितायाः वाराणस्याः विस्तारः पूर्वे योजनद्वयं अन्यत्र अर्धयोजनमस्ति।[7] मत्स्यपुराणस्य मुद्रितसंस्करणे अस्य क्षेत्रस्य विस्तारः अधिकस्पष्टरूपेण वर्णितोऽस्ति।[8] पूर्वपश्चिमे भीष्मचण्डीतः पर्वतेश्वरं यावत् योजनद्वयम्, उत्तरदक्षिणे अर्धयोजनम्,

1. Sharma, Dr. Kamal; Geography of India, PP-373-
2. अर्धयोजनविस्तीर्णं तत्क्षेत्रं दक्षिणोत्तरम्।
   वाराणसी तदीया च यावच्छुक्लनदी तु वै।। मत्स्यपुराणम् 183/62
3. भीष्मचण्डिमारभ्य पर्वतेश्वरमन्त्रिके।
   गणा यत्रावतिष्ठन्ति सन्नियुक्ता विनायकाः।। मत्स्यपुराणम् 183/63
4. ब्रह्मपुराणम् पृ. 185
5. The Skand-Purana, Tagare, Dr. G.V. Vol-4, P-144.
6. लिङ्गपुराणम् द्विनवतितमोऽध्यायः 95-100, 106-107.
7. द्वियोजन्ते पूर्वं स्याद् योजनार्द्धं तदन्यथा।
   वारणा च नदी चासीत् तयोर्मध्ये वाराणसी।। अग्निपुराणम्।। 112/6
8. मत्स्यपुराणम् 183/51

शेषभागः वारणास्योः मध्ये। पद्मपुराणान्तर्गतकाशीमाहात्म्ये एवमवादिवाराणसीति विख्याता तन्मानं निगदानि वः, दक्षिणोत्तरयोर्नद्योर्वरणा–सीश्च पूर्वतः। जाह्नवी पश्चिमेऽत्रापि पाशपाणिर्गणेश्वरः'[1]

मत्स्यपुराणे भगवान् शिवः वाराणसीमेवं वर्णयामास–

प्रविष्टा त्रिपथा गङ्गा तस्मिन् क्षेत्रे मम प्रियेम्॥[2]

वाराणसीक्षेत्रस्य विस्तारः मत्स्यपुराणे अन्यत्र एवम्प्रकटितः।[3]

1.2. ऐतिहासिकदृष्ट्या निरूपणम्

काशीविदेहस्य प्रयोगः कौशितक्युपनिषदि प्रथमत्वेन आयाति।[4] बृहदारण्यकोपनिषदि गार्गी अजातशत्रुं काशीराज्ञा रूपेण अथवा विदेहराज्ञा रूपेण इति सम्बोधितवती।[5] शाङ्खायनश्रौतसूत्रे जलजातुकर्णी काश्याः विदेहराज्ञः पुरोहितः इत्यभिहितमस्ति।[6] बौधायनश्रौतसूत्रेऽपि[7] काश्याः पार्श्ववर्तिक्षेत्रस्य उल्लेखः प्राप्यते। गोपथब्राह्मणेऽपि काशीकौसलस्यापि व्यवहारः दृग्गोचरो भवति। महाभाष्यस्य 'काशीकौसलीया' इत्युदाहरणं काशीकौसलजनपदवाचकशब्दानां संयोजनेन निर्मितमस्ति। अथर्ववेदे वारणावतीनद्याः उल्लेखः अस्ति। यदाधृत्य वाराणसीतिनामकरणं सङ्गतम्भाति। पुराणप्रतिपादितविवरणं काश्याः धार्मिक–विश्वासोपरि तत्रापि विशिष्य शिवपूजायामुपरि प्रकाशं प्रयच्छति। पुराणेषु काशीवंशोद्भवस्य मार्गद्वयं प्रत्यपादि। ब्रह्माण्डवायुप्रभृतिसप्तपुराणानुसारं वंशोऽयं आयुपुत्रात् प्रारभ्यते।[8] अनुश्रुतिमिमामाश्रित्य अस्मात् वंशात् प्राक् चत्वारः राजानः क्षत्रवृद्धः, सुनहोत्रः, दीर्घतपस् चात्र बभूवुः। महाभारतेऽपि[9] यत्र तत्र काशीविषये किञ्चिद्विवरणमुपलभ्यते। एकत्रोक्तं यत्काशीराज्ञः दुहितायाः सर्वसैन्याः विवाहः राज्ञा दुष्यन्तेन सह अभूत्। भीष्मः स्वयंवरे स्वभ्रातुः विचित्रवीरस्य कृते काशीराज्ञः पुत्रीत्रयं अम्बाम्, अम्बिकाम्, अम्बालिकाञ्च विजितवान्।[10] एकत्र काशीराजा सुबाहुः गङ्गापुत्रेण भीष्मेण जितः इति विवरणस्यापि उल्लेखः प्राप्यते।[11] कथ्यते यत्काशीराजा युधिष्ठिरस्य मित्रमासीत्। तेन सङ्कटापन्नसमये

---

1. पद्मपुराणम् 17/5
2. मत्स्यपुराणम् 183/7
3. नैमिषेऽपि कुरुक्षेत्रे गंगाद्वारे च पुष्करे। स्नानात्संसेविताद्वापि न मोक्षः प्राप्यते यतः।।
   इह संप्राप्यते येन तत एतद्विशिष्यते। प्रयागे च भवेन्मोक्ष इह वा मत्परिग्रहात्।। मत्स्यपुराणम् 180/55–56
4. कौशितकी उपनिषद् 4/1
5. वृहदारण्यकोपनिषद् 3/8/2
6. शांख्यान श्रौतसूत्र 16/19/5
7. बौधायन श्रौतसूत्र 21/13
8. गोपथ ब्राह्मण 1/2/9
9. महाभारत, आदिपर्व अध्याय–95
10. महाभारत, उद्योगपर्व 172/94
11. महाभारत, सभापर्व अध्याय 30

पाण्डवानां साहाय्यमाचरितम्।[1] रामायणे काशीसम्बद्धमल्पं विवरणमुपलभ्यते। उत्तरकाशीराज्ञः पुरुरवसः चर्चा प्राप्यते।[2] तस्मिन्नेव काण्डे यायातिपुत्रः पुरुः प्रतिष्ठानोपरि शासनं कुर्वन् काश्याः अपि राजा आसीत् इति व्यलेखि।[3] सूर्य इव महातेजस्वी परमधार्मिकः राजा भगीरथः राज्ञः सगरस्य अश्वसहितसमग्रपुत्राः कपिलमुनितपोजन्यानलेन भस्मीकृताः इति कथामाकर्ण्य पृथिव्यां गङ्गावतरण-माध्यमेन तेषामुद्धारार्थं कठोरतपः अनुष्ठातुं दृढप्रतिज्ञाञ्चकार। गङ्गावतरणानन्तरं गङ्गायाः काश्यां विवरणोल्लेखः प्रख्यापयति यदत्र ततः पूर्वमपि काश्याः अस्तित्वमासीत्। बौद्धसाहित्येऽपि काश्याः स्वरूपस्य विस्तृतविवेचनम्प्राप्यते। महाभारतस्य युद्ध-कालादारभ्य मगधोपरि ईसापूर्वसप्तमशताब्दीं यावत् यदा शेषनागवंशस्य उदयः अभूत्, तदा बार्हद्रथराज्ञां राज्यमासीत्। अस्य युगस्य पालीवाङ्मयान्निश्चीयते यत् बौद्धजन्मनः प्राक् कतिपय शताब्द्याः प्राक् काश्यामुपरि ब्रह्मदत्तवंशस्य राज्यमासीत्। जातकग्रन्थः यः खलु प्राचीनभारतीयराजनीतिव्यवस्थायाः आदिस्रोतोऽस्ति, तेन ग्रन्थेन ज्ञायते मगध-वत्स-काशी-कौसल-उत्तरपञ्चालप्रदेशाश्च मगधगङ्गोपत्यकायाः मुख्यजनपदानि आसन्। काशी षोडश जनपदेषु अन्यतमं मुख्यं जनपदमासीत् अपि चात्र ब्रह्मदत्तवंशस्य राज्यमासीत्। मत्स्यपुराणानुसारं[4] ब्रह्मदत्तवंशस्य शतसङ्ख्याकाः राजानः काश्यामुपरि राज्यङ्कृतवन्तः अस्माकं धार्मिकसाहित्ये एवम्भूतानि अनेकानि तथ्यानि सन्ति यानि वाराणसीक्षेत्रस्य ऐतिहासिकपरम्पराम् अभिव्यनक्ति। काशी शैवधर्मस्य प्रसिद्धक्षेत्रमस्ति अस्य साक्ष्यं पुराणमेव अस्ति। तीर्थं शिवस्य प्रधानक्षेत्रमस्ति न इदानीन्तः अपितु तदानीन्तः यदा भगवान् विष्णुः शिवाय क्षेत्रमिदमुपहाररूपेण ददौ। काशी शिवस्य प्रधाननगरीरूपेण प्रतिष्ठिता अस्ति। यद्यप्यत्र शिवपूजनस्य प्राधान्यमस्ति तथापि अन्येषां देवानामप्यत्र अतीवमहत्त्वमस्ति। विश्वनाथज्योतिर्लिङ्गस्य क्षेत्रमिदं इतिहासस्य प्रत्येकं क्षेत्रम् अतीवमहत्त्वं विधत्ते।

1.3 तन्त्रदृष्ट्या वास्तुशास्त्रीयं विश्लेषणम्

1.3.1-सम्पूर्णमन्दिरप्राङ्गणं विशालपरकोटा इत्यनेन आवृतमस्ति यत्र विश्वनाथस्य, अन्नपूर्णामातुः, सौभाग्यगौर्याः, गणेशस्य, सत्यनारायणादीनां मन्दिराणि संस्थितानि। मुख्यमन्दिरं एकस्यां सङ्कीर्णवीथ्याम् अवस्थितमस्ति। अस्य सन्निकटे नाना यत्र तत्र सर्वत्र विविधदेवीदेवानां मन्दिराणि वर्तन्ते। मुख्यमन्दिरे प्रवेशार्थं सम्प्रति अनेकानि द्वाराणि निर्मितानि सन्ति। मुख्यतः मन्दिरस्य रजतमण्डितं विंशतिफीटपरिमितं मन्दिरं निर्मितमस्ति। अविमुक्तेश्वरमहादेवः मन्दिरस्यास्य पार्श्वे विद्यमानः अस्ति। तन्त्रोक्तदृशा भगवतः शिवस्य कृते दक्षिणद्वारं मुख्यत्वेन उपयुज्यते। एतदतिरिक्तं द्वारान्तरमेव कार्यालयस्य पार्श्वे एव अग्निकोणे संस्थितमस्ति। विश्वनाथ-मन्दिरस्योत्तरभागे लघुद्वारद्वयं वर्तते। यत्खलु एकीभूय बहिः निस्सरति, यत्र सम्प्रति यवनधार्मिकस्थलं विद्यमानमस्ति। किञ्च विश्वनाथमन्दिरस्य प्रत्यग्द्वारमपि प्रवेशार्थं वर्तमानम्भवति। जनानां सम्मर्दस्य नियन्त्रणार्थं लघुद्वाराणां निर्मितिः कृता विद्यते। मुख्यतया अस्य मन्दिरस्य दक्षिणद्वारमेव प्राचीनतममस्ति। मुख्यमन्दिरस्य द्वारं विशालमस्ति। अत्र विविधदेवतानां

1. महाभारतम् उद्योगपर्वः अध्यायः अ. 72
2. रामायणम्, उत्तरकाण्डः 53/25
3. रामायणम्, उत्तरकाण्डः 59/19
4. मत्स्यपुराणम्, पृ. 556, 675 आनन्दाश्रमसीरीज

सन्निवेश: कृत: वर्तते। विश्वनाथमन्दिरस्य गर्भगृहं चतुर्षु भागेषु मुक्तमस्ति। (वीथी/प्रतोली) पूर्वीद्वारम्, प्रतीचीद्वारमपि च उत्तरीद्वारं प्राय: 7X5 फिट उच्चैरस्ति। पश्चिमीद्वारं 10X5 फीटपरिमितोन्नतमस्ति। यन्मन्दिरस्य पश्चिमभागे मण्डपोपरि अपावृतमथवा उद्घाटितम्भवति। खर्जूरमण्डिता: विविधकला-तयोऽप्यत्र विद्यमाना: सन्ति। विश्वेश्वरमन्दिरस्य गर्भगृहं नातिधिकविशालमाहोस्विन्नातिलघु वर्तते। तदिदं 12X2 फीटपरिमितमस्ति। गर्भगृहस्य मध्यपीठिकायां हस्तैकपरिमितशिवलिङ्गमेवस्थितमस्ति। शिवलिङ्गस्य अधव अवस्थिततत्वात् भक्ता अवनतीभूय शिवमर्चयन्ति। शिवलिङ्गस्य आयताकारिका पीठिका रजतनिर्मितमथवा कलधौतनिर्मितास्ति। पीठिकेयं 2X2 फीटपरिमिता अस्ति। प्रणालमुत्तराभिमुखमस्ति। अपराजितापृच्छामतानुसारं[1] स्थण्डिला-वापी-यक्षी-वेदी-मण्डला-पूर्णचन्द्रा-वज्री-पद्माकृति-अर्धचन्द्रा-त्रिकोणभेदेन दशधा भवन्ति। मण्डलाकारिकापीठिका मेखलालङ्कृतत्त्वात् मण्डला इति नाम्ना अभिधीयते। लिङ्गायाम् इव स्थूला पीठिका भवेत्। अत्यधिकसम्मर्दत्वात् ज्योतिर्लिङ्गस्य आयाताकारपीठिकायामुपरि चतुर्षु दिक्षु द्वारेण परिवृत्य चतुर्षु प्रहरेषु विश्वनाथस्य पूजा आयोज्यते। मन्दिरस्य गर्भगृहं चतुर्षु भागेषु रजतमण्डितमस्ति विशिष्य द्वारमुपरिभागश्च। विविधकलाकृतिमण्डितस्यास्य गर्भगृहस्य स्वरूपमतीवाद्भुतम्प्रतीयते। गर्भगृहस्य ईशानकोणे अहोरात्रं दीप: प्रज्वलितो भवति। दण्डदीपस्योर्ध्वार्धरजतभाग: प्रच्छन्न अस्ति। गर्भगृहस्य विविधदेवतानां प्रतीकं तन्त्रात्मकरूपेणाङ्कितमस्ति। प्रसादस्य गर्भगृहस्य रूपं चतुरस्रम्, आयतरूपम्, वृत्तरूपम्, वृत्तायतरूपम्, तथा च अष्टाश्रमरूपञ्च भवति।[2] गर्भमध्यात् प्रथमं मण्डलं शिवस्य स्थानम्भवति। तन्मेरुमण्डलमिव मध्यस्थम्भवति।

षष्टिपरिमितस्य उन्नतमन्दिरस्य विमानं स्वर्णजडितम्भवति। समग्रविमानभागत: शिखरं यावत् 45/2 परिमितस्वरेण पञ्जावप्रदेशस्य (पञ्चनदप्रदेशस्य) महाराणारञ्जीतसिंहेन ऊनचत्वारिंशदधि-काष्टादशशततमे अकारि। यस्मात् कारणात् मन्दिरमिदं स्वर्णमन्दिरमित्यपि अभिधीयते। मन्दिरस्य शिखरभाग: सप्तत्रिंशच्छृङ्गै: निर्मितोऽस्ति यत्र कलशा: अपि विद्यन्ते। प्रसादमण्डनानुसारं शृङ्गनिर्मित: प्रासाद: हिमवान् प्रासाद इत्युच्यते। यत्र द्वादशकोणा:, षोडशप्रतिरथा:, अष्टौ मुद्रा: शिखरञ्च भवति। एतादृश: हिमवान् प्रासाद: देवमनुष्यनागकुमारै: पूज्यते।[3] मुख्यशिखरभागे अमलसारिव स्वरूपम्प्राप्यते। प्राय एकहस्तपरिमितायताकार-शिखरोपरि अमलसार: विद्यमान अस्ति। उपरिभागे श्रीयन्त्रमपि विद्यमानमस्ति। प्रासादमण्डनानुसारं उच्चैश् चतुर्धा विभज्य पादोनभागस्य ग्रीवा सपादैकभागस्य मलासार: एकभागेन चन्द्रिका एकभागेन अम्लसारिका निर्मातव्या।[4] दीपार्णवानुसारं स्कन्धस्य विस्तार: आम्लसारस्य विस्तार:

---

1. अपराजितपृच्छा, सूत्र 135, पृ. 763-772
2. प्रासादमण्डनम् पृ. 256
3. रथयोरूभयोर्मध्ये वृत्तमामलसारकम्।
   उच्छ्रयो विस्तारर्धेन चतुर्भागैर्विभाजयेत्।।
   ग्रीवा चामलसारश्च पादोना च सपादक:।
   चन्द्रिका भागमानेन भागेनामलसारिका।। प्रासादमण्डनम् 4/32-33, पृ. 137
4. प्रासदमण्डनस्य शर्मा भास्कर:, जगदीशपुस्तकालय:, सं. 2004, पृ. 137

चतुर्भागः स्यात्।[1] आमलसारस्य विस्तारस्य अष्टविंशतिः भागाः चतुर्दशांशाः कर्तव्याः। उदये त्रिभागस्य कण्ठः पञ्चभागस्य अण्डकः भागत्रयस्य चन्द्रिका तथा भागत्रयस्य अमलसारिका भवेत्। अमलसारिकाया मध्यगृहस्य विस्तारे सार्धभागः, ततः अर्धाधिकद्विभागः चन्द्रिकाः ततः पञ्चभागः अण्डकः भवेत्।[2] अमलसारस्योपरि कमलदलं विद्यमानमस्ति। एतेषु दलेषु उपरि कलशः तदुपरि पिहितकमलं विद्यमानमस्ति। कलशोपर्येव पताका विद्यमाना अस्ति। शिखरभागस्य पार्श्वे एव विशालगुम्बदः विद्यमानः अस्ति। अस्य शिखरभागेऽपि पिहितकमलमेव विद्यमानमस्ति। पिहितकमलमविकसितसृष्टेः प्रतीकमस्ति। अस्य प्रारम्भः बिन्दुस्थानमस्ति, यतः तन्त्रकला प्रारभ्यते। क्षीरार्णवानुसारं मङ्गलकलशः मन्दिरेषु राज्ञां प्रासादेषु, सर्वदेवतास्थानेषु सामान्यजनानां भवनेष्वपि स्थापनीयः। एवं विश्वकर्मणाऽपि विनिर्देशि-[3] गोविन्दः कलशस्य लक्षणङ्कृतवान्। यस्य सूत्रमानेन नवधा विभज्य प्रयोक्तव्यः। यदि प्रासादः शैलोत्पन्नप्रस्तरेण निर्मितः अस्ति तर्हि शैलोत्पन्नप्रस्तरनिर्मितकलशः स्थापितव्यः। यदि काष्ठनिर्मितस्तर्हि काष्ठस्य, धातुनिर्मितः अस्ति तर्हि धातोः इष्टिकानिर्मितः अस्ति तर्हि इष्टिकायाः कलशः समुचितरूपेण स्थापनीयः। स्वर्णकलशः सर्वविधमनोकामनापूरको भवति। अत्रापि सर्वप्रासादेषु स्वर्णकलश-ध्वजस्य स्थापनं वरमिति प्रत्यपादि।[4] प्रासादस्य अष्टमांशेन कलशाण्डकस्य स्थूलता निर्धारणीया तथा यदि षोडशभागः वर्धेत यदि ज्येष्ठमानकलशस्य तथा यदि द्वात्रिंशद्भागः वर्धेत तर्हि मध्यमानकलशस्य उदयः भवति। इत्थम्प्रकारेण उदीयमानस्य नवभागेषु एकभागेन ग्रीवापृष्ठयोः भागत्रयेण अण्डकस्य कलशोदरस्य, कर्णिकाद्वयस्य प्रत्येक भागेन तथा भागत्रयेण बीजपूरकस्य निर्माणङ्कर्तव्यम्।[5]

गर्भगृहस्य पश्चिमभागः द्विधा विभक्तः अस्ति। प्रथमभागः विशालमण्डपस्य अस्ति यस्य मध्ये वैकुण्ठेश्वरमहादेवस्य शिवलिङ्गं विद्यमानमस्ति। एतदतिरिक्तानि नैकानि शिवलिङ्गानि निकषैव विद्यमानानि सन्ति। दर्शनार्थिनः पश्विमद्वारात् अनेनैव द्वारेण गत्वा गर्भगृहे प्रविशन्ति। मण्डपस्य पूर्वोत्तरभागे प्रायः द्वादशहस्तपरिमिताः पञ्चस्तम्भाः परिकल्पितास्सन्ति। गर्भगृहान्मण्डपमधो वर्तते। यस्मात् कारणात् गर्भगृहं प्रवेष्टुमिह सोपानव्यवस्था परिकल्पिता अस्ति। मण्डपस्य आन्तरिक-स्वरूपम्प्रायः 20X15 अस्ति। मण्डपस्य पश्विमे भागे दण्डपाणेः भव्यमन्दिरमस्ति। प्रायः अष्टगुणितदश 10X8

---

1. (क) स्कन्धे षडंशके सप्तभाग आमलसारकाः। अष्टविशंति भक्ते तु उदयः स्यात्तदर्धतः।।
   ग्रीवाभाग त्रयं कार्यं अण्डकं च पञ्चभागिकं। त्रिभागा चन्द्रिका कार्यामलसारी तथैव चम।।
   निगमे सार्धषड्भागम् कुर्यादामलसारिकाम्। चन्द्रिका च द्विसार्धांशां अण्डकं पञ्चभागिकम्।।
   कलानिधिः 8,17-19
   (ख) मिश्र जनार्दनः भारतीय प्रतीक विद्याबिहार राष्ट्रभाषा परिषद, पटना, सं. 1959, पृ. 271
2. अभिशक्तो दिव्यघटैः फलपल्लवसंयुतैः। सर्वपापविनिर्मुक्तः श्रियं प्राप्नोति मानवः।।
   क्षीरार्णवे समुत्पन्नं प्रासादस्याग्रजातकम्। प्रासादो देवतानां च नरेन्द्राणां च हर्म्यर्कम्।। कलानिधिः पृ. 3, 4-6
3. तत्रैव 9, 7-9
4. तत्रैव 9, 10-12
5. (क) कपूर डॉ. वीणा, अपराजितपृच्छा प्रतिमाविधान के परिप्रेक्ष्य में, पृ. 48
   (ख) रूपमण्डनम् 5/8-13

परिमितगर्भगृहे दण्डपाणेः शिवलिङ्गं विद्यमानमस्ति। अन्तः इदं जीर्णावस्थायाम्प्रकटितम्भवति। वस्तुतः दण्डपाणिः भैरवस्य प्रतीकमस्ति यः पश्चिमभागे विद्यमानः अस्ति। शिवपुराणानुसारं भैरवः शिवस्य पूर्णरूपमस्ति। ब्रह्माण्डस्य संरक्षकत्वादस्याभिधानम्भैरव इति। यतोऽयं भयङ्करः अत एव काल इव ज्ञायते कालभैरवः। यतः मृत्युदेवः कालोऽपि अस्माद्भीतः। पापरक्षकत्वात्। अयं हि स्वभक्तानां पापं नश्यति।[1] भैरवः अस्य काशीनगरस्य प्रमुखदेवानामन्यतमोऽस्ति। पूर्वाभिमुखस्य भैरवनाथमन्दिरस्य वास्तुशास्त्रीयस्वरूपमद्भुतमस्ति। मन्दिरमिदं त्रिंशद्धस्तपरिमितं आन्तरिकोन्नतमस्ति। अन्यदेव्यः अन्यदेवाश्चात्र विद्यमानाः सन्ति।

मुख्यमन्दिरस्य वायव्यकोणे मातुः पार्वत्याः मन्दिरमस्ति। मन्दिरे पार्वत्याः गणेशस्य च प्रतिमा वर्तते। अस्य मुख्यद्वारं दक्षिणाभिमुखमस्ति। प्रायः विंशतिफीटद्वारेण पार्वत्याः मन्दिरे प्रवेशस्सम्भवति। मन्दिरस्य अन्तः भागः अत्यधिकमुन्नतं नास्ति। मन्दिरस्य पार्वत्याः मातुः गणेशस्य च कृते क्रमशः दक्षिणाभिमुखजगती तथा पश्चिमाभिमुखजगती विद्यमाना अस्ति। यत्रोपरि उभयोः द्वादशफीटपरिमिता प्रतिमा विद्यमाना अस्ति। पार्वती माता शान्ता आशीर्वादात्मकमुद्रायामवस्थिता गणेशश्च प्रसन्नमुद्रायामवस्थितोऽस्ति।

मुख्यमन्दिरस्याग्नेयकोणे अन्नपूर्णायाः मातुः मन्दिरमस्ति, यत्र प्रवेशार्थं द्वारद्वयमस्ति प्रथमं दक्षिणाभिमुखं द्वितीयं पश्चिमाभिमुखम्। उभयमपि पार्वत्याः मन्दिरस्य मण्डपोपरि उद्घाटितम्भवति। मण्डपोपरि नाना देवताः विशिष्टशिवलिङ्गानि विद्यमानानि सन्ति। अन्नपूर्णायाः मातुः दक्षिणद्वारं द्विफीटपरिमितम्, पश्चिमद्वारम्पञ्चफीटपरिमितं वर्तते। अन्नपूर्णामातुः मन्दिरम् उत्तरपश्चिमद्वारेण सह सम्बद्धमस्ति। अन्नपूर्णामातुः मन्दिरेऽस्मिन् त्रीफीटपरिमिता उन्नता जगती अस्ति या पश्चिमदक्षिणभागे मुक्ता अस्ति। अन्नपूर्णामातुः प्रायः द्विफीटपरिमितप्रतिमा दक्षिणाभिमुखी अस्ति तत्रैव लघु शिवलिङ्गं विद्यमानमस्ति। मातुः प्रसन्नमुद्रायामद्भुतस्वरूपं मन्दिरस्य गर्भगृहे दृग्गोचरम्भवति। अन्यानि दीर्घमन्दिराणि प्राङ्गणाद्बहिः विद्यमानानि सन्ति। प्राङ्गणस्य नैऋत्यकोणे सत्यनारायणस्य मन्दिरं विद्यमानमस्ति। मन्दिरस्य गर्भगृहे भगवतः सत्यनारायणस्य लक्ष्म्याश्च प्रतिमा 3X2 1/2 फीटउन्नतजगत्यां विद्यमाना अस्ति। एतदतिरिक्तं गणेशस्य पञ्चाननशिवस्य स्वरूपमपि अस्ति। मन्दिरस्य मुख्यद्वारं पूर्वाभिमुखमस्ति। तस्य अग्रे विस्तृतम्मुख्यमण्डपं विद्यमानमस्ति। भगवतः सत्यनारायणस्य भगवत्याः लक्ष्म्याः अत्र विद्यमानत्वं सृष्ट्याः उद्भवस्थलत्वं अत्र द्योतयति।

विश्वेश्वरनाथमन्दिरस्याग्नेयकोणे अविमुक्तेश्वरमहादेवस्य मन्दिरं विद्यमानमस्ति। तत्रैव रजतमण्डितं विशालदक्षिणद्वारमस्ति। द्वारमिदं सर्वाधिकप्राचीनमस्ति। मन्दिरस्य गर्भगृहे शिवलिङ्गं प्रतिष्ठितम्भवति। अस्य मुख्यद्वारं उत्तराभिमुखमस्ति।

विश्वनाथस्य मन्दिरस्य पूर्वे साक्षात्समक्षं तारकेश्वरनाथस्य तथा तत्साक्षात्समक्षं भुवनेश्वरनाथस्य शिवायतनं विद्यमानमस्ति। तारकेश्वरमन्दिरे प्रवेशार्थं प्रायः पञ्चफीटपरिमितं पूर्वीद्वारं, दक्षिणद्वारञ्चास्ति।

---

1. (क) प्रासादमण्डनम् 7/9, पृ. 153
   (ख) अपराजितपृच्छा सूत्र 184/5-6

यदि अवधानेन दृश्यते चेत् एषामान्तरिकस्वरूपं भूपुरयन्त्रोपरि संस्थितमित्यवलोक्यते। तारकेश्वरनाथमहादेव–मन्दिरस्य मुखमण्डपस्य क्षेत्रमतिदूरं यावत् विस्तृतमस्ति यत् भागत्रयेण मुक्तमस्ति। मुखमण्डपे अष्टादशस्तम्भाः विद्यमानाः सन्ति। गर्भगृहस्य अग्रस्थमुखमण्डपोदयस्य सार्धत्रयोदशभागं सार्धचतुर्दशभागं अथवा सार्धपञ्चदशभागं विभज्य एषु अष्टभागेन नवभागेन अथवा दशभागेन चन्द्रावलोकः भवेत्। तारकेश्वरमन्दिरस्य पूर्वस्मिन् भागे भूपुरयन्त्रोपरि भुवनेश्वरनाथमन्दिरं प्रतिष्ठितमस्ति। मन्दिरस्य गर्भगृहे विशालं शिवलिङ्गमस्ति अस्य 6 फीटपरिमितं विशालमुन्नतं मुख्यद्वारमस्ति। पश्चिमाभिमुखं मन्दिरस्य द्वारं लघु वर्तते। साम्प्रतिकमन्दिरमिदं शैलीदृष्ट्या अत्यन्तप्राचीनमस्ति। प्राङ्गणस्याग्निकोणद्वारस्य तथा विशालमण्डपस्याग्निकोणद्वारस्य पार्श्वे कार्यालयः स्थितः अस्ति, तथा उत्तरभागे ईशानकोणे स्थितद्वारस्य पार्श्वे मन्दिरस्य कर्यालयान्तरः विद्यते। मुख्यमन्दिरस्य प्राङ्गणे उत्तरभागे विशालं कूपहोमस्थलं विद्यमानमस्ति। तस्य परकोटा इति निर्मितिविशेषः सम्बद्धप्राचीनमन्दिरं यत् सम्प्रति मस्जिदरूपेण अस्माकं समक्षं विद्यमानमस्ति। अत्रैकं विशालसभामण्डपमपि[1] विद्यमानमस्ति।

1.3.2 प्राचीनविश्वनाथमन्दिरस्य स्वरूपम्

विदुषाम्मतमिदं प्राचीनविश्वनाथमन्दिरस्य वास्तुकला अत्यन्तसमृद्धा उत्कृष्टा चासीत्। तेषामनुसारेण प्राचीनेऽस्मिन् मन्दिरे पञ्च मण्डपानि आसन्। येषु मण्डपेषु पूर्वस्थमण्डपस्य परिमलः 125X35 फीटपरिमितं यावदासीत्। यञ्च रङ्गमण्डपमासीत् यत्र धार्मिकोपदेशाः आयोज्यन्ते स्म। टोडरमलनामकेन ऐतिहासिकपुरुषेण मण्डपमिदं परिमार्जितमासीत्, येन मन्दिरस्य आसन्दिका सप्तफीटपरिमितं यावत् उन्नतीभूय मार्गोच्चतासमा जाता आसीत्। इस्लामानुयायिनाम् आतङ्केन मूर्तयः न पुनः विस्थापितीकृताः। षोडशशताब्द्यां विश्वनाथमन्दिराकारश्चतुर्भुजः आसीत्, यस्य प्रतिभुजं परिमितिः 124 फीडिति यावदासीत्।[2] गर्भगृहात् सम्बद्धानि चतुरन्तर्गृहाणि 16X10 फीटपरिमितानि अथ चतुर्मण्डपसम्बद्धानि लघूनि अन्तर्गृहाणि अपि 12X8 फीटपरिमितानि आसन्। प्राचीमण्डपे दण्डपाणेः प्रतीचीमण्डपे च द्वारपालानां मन्दिराणि आसन्। मन्दिरस्य चतुष्कोणेषु 12 फीटपरिमितिं यावद् उपमन्दिराणि आसन्। नन्दीमण्डपं मन्दिरस्य बहिः आसीद् यो हि 128 फीटपरिमितिं यावान् उच्चः आसीत्। मण्डपानां मन्दिराणां च शिखराणि क्रमशः 64, 48 फीटयावदुच्चानि आसन्। मन्दिरस्य चतसृषु दिक्षु प्रदक्षिणपथः आसीत्।[3] यत्र नैकेषां देवानां मन्दिराणि आसन्। मन्दिरस्य प्राङ्गणात् बहिरेव विश्वनाथज्योतिर्लिङ्गस्य दक्षिणे भागे भगवत्यन्नपूर्णायाः 60 फीटपरिमितमुच्चमन्दिरमवस्थितमस्ति। अस्य मुख्यद्वारं प्रायशः 4X7 फीटपरिमितं वर्तते। मन्दिरस्य प्राङ्गणं सुविस्तृतं वर्तते यत्र विविधदेवानाम् उपस्थानङ्कल्प्यते।

मन्दिरस्य गर्भगृहे प्रायशः 3/2 फीटपरिमितः आधारो विद्यते यत्र अन्नपूर्णायाः स्वर्णप्रतिमा स्थापिता वर्तते। अयमाधारः खलु 5 फीटपरिमितः उच्चः स्यात्। अन्नपूर्णाप्रतिमा इयं नैकरत्नैः सुसज्जिता वर्तते। ईदृश्याम्प्रतिमायां मातुरन्नपूर्णायाः प्रसन्नात्मिका आशीर्वादात्मिका च मुद्रा अत्र

1. प्रासादमण्डनम् 7/5-6
2. Aggrawal, R.S.; History of Visvesvara Temple, P-48.
3. तत्रैव पृ. 59

विद्यमाना अस्ति। यस्याः दक्षिणे हस्ते सृष्टिमूलस्य प्रतीको घटः वामे च हस्ते अन्नवितरणत्वं दर्शितमस्ति। शिरसि मुकुटं तदुपरि छत्रश्चापि दर्शितो विद्यते। मन्त्रमहोदध्यनुसारेण[1] तप्तस्वर्णमिव कान्तिमत्याः शिरसि चन्द्रकलायुतमुकुटं धृतायाः रत्नप्रभाभिः देदीप्यमानायाः, नानावस्त्रैरलङ्कृतायाः, त्रिनेत्रवत्याः द्वयोर्हस्तयोः दूर्वास्वर्णपात्रं च वहन्त्याः समुन्नतस्तनमण्डलविराजितायाः नृत्यं कुर्वत्याः सदा शिवं दर्शं दर्शं च प्रसन्नशीलायाः अन्नपूर्णेश्वरीनाम्न्याः देव्याः ध्यानं कर्तव्यम्। त्रिकोण-चतुर्दलादिभिरन्वितस्य निर्मितयन्त्रस्योपरि एतस्याः देव्याः आसनं स्थापनीयमिति। ॐ ह्रीं श्रीं क्लीं भगवति माहेश्वर्यन्नपूर्णायै स्वाहा इत्येत् तन्त्रमन्त्रद्वारा पूजनस्य महत्त्वं निगदितं वर्तते। विनियोगश्च एवं भाव्यते-अस्य श्री अन्नपूर्णामन्त्रस्य द्रुहिणार्षिः कृतिछन्दः अन्नपूर्णेश्वरी देवता ममाभीष्टसिद्ध्यर्थे जपे विनियोगः। एतस्याः प्रतिमायाः समीपम् एव भगवतश्शिवस्यापि 5 फीटपरिमितिं यावती अन्या प्रतिमाऽपि मण्डपस्य गर्भगृहे स्थिताऽस्ति। गर्भगृहं तु विविधयन्त्रैः सह सन्निविष्टं वर्तते। एतस्य गर्भगृहस्य मुख्यद्वारं प्रायशः 6 फीटपरिमितं वर्तते, येन गर्भगृहे प्रवेशः सम्भवति एतद्गर्भगृहस्य अग्रिमो भागः मण्डपदिशि उद्घाटितोऽस्ति। मण्डपस्य पश्चिमभागे श्रीयन्त्रमपि निर्मितमस्ति। अस्य सभामण्डपं दर्शनार्थिनां पूजनार्थिनाञ्च कृते निर्मितमस्ति। विमानस्योपरि शिखरस्य समीपे च प्रकाशस्यापि व्यवस्था कृता वर्तते, यन्त्रस्थशृङ्गाणामुपरि कलशाः स्थापिताः सन्ति। एतच्छृङ्गदर्शनेन त्रिकोणातिरिव प्रतीतिर्जायते यत्र अष्टचत्वारिंशत् शृङ्गाणि मन्दिरस्य शोभां वावर्धयन्तः एव प्रतिभान्ति। मन्दिरशिखरे च कलशाः सुशोभिताः तिष्ठन्ति। मन्दिरप्राङ्गणे अन्येषां नैकदेवानां वासः उपकल्प्यते। मातुरन्नपूर्णायाः प्रतिभातः आग्नेयकोणे सूर्यदेवनिकेतनं विद्यमानमस्ति। यत्र सूर्ययन्त्रे भगवतः सूर्यस्य 4 फीटपरिमिता मूर्तिः स्थापिता वर्तते। रक्तवर्णीयः प्रचण्डतेजस्वी शतारविन्दासने शुभलक्षणान्वितः सर्वाभूषणावृतः द्विभुजयोः श्वेतपङ्कजं वर्णीये शरीरे च च रक्तवर्णवस्त्रञ्च धृतः असौ सूर्यः सर्वपापनाशकः इति कीर्त्यते। अग्निपुराणानुसारेण सूर्योऽयं सप्ताश्वैः दृष्टः एकचक्रीये रथे आरूढश्च उपकल्प्यते। देवस्य अस्य द्वयोर्हस्तयोः कमलपुष्पमिष्यते।[2] एतस्य मन्दिरस्य ईशानकोणे कुबेरस्य वायव्यकोणे श्रीहनुमतः नैऋत्ये च कोणे गणेशस्य प्रतिमाः स्थापिताः सन्ति। वायव्ये हि कोणे एका प्राचीना कूपी अपि स्थिताऽस्ति। प्राङ्गणे नैकानि शिवलिङ्गानि अपि उपलभ्यन्ते दरीदृश्यन्ते च। काशीविश्वनाथ-ज्योतिर्लिङ्गमिदमपि च भगवतः शिवस्य नगरीयं युगयुगान्तरं यावत् पूजितमस्ति। एवम्परम्परा अस्ति यत् काश्याः निर्माणं स्वयं शिवः भूमिवलयजलयोः विभाजनात् प्रागेवाकरोत्।[3] भगवतः अस्य प्रियनगरस्य काशीतोरिक्तानि अनेकानि नामानि सन्ति वाराणसी अविमुक्तक्षेत्रम्, आनन्दकाननम्, रुद्रावासः महाश्मशानमित्यादि।

---

1. तप्तस्वर्णनिभा शशांकमुकुटा रत्नप्रभामासुरा
   नानावस्त्रविराजिता त्रिनयना भूमीरमाभ्यां युता।
   दर्वीहाटकभाजनं च दधती रम्याच्च पीनस्तनी
   नृत्यन्तं शिवमाकलय्य मुदिता ध्येयान्नपूर्णेश्वरी।। मन्त्रमहोदधिः 9/77
2. अग्निपुराण अध्याय 51/श्लोक 1-3
3. काशीखण्डम् 26/28

अयनांश-विमर्शः

श्रीचन्द्रकान्तः

यात्राविवाहोत्सवजातकादौ खेटैः स्फुटैरेव फलस्फुटत्वम्।
स्यात् प्रोच्यते तेन नभश्चराणां स्फुटक्रिया दृग्गणितैक्यकृद्या[1] ॥

ग्रहस्पष्टीकरणोपक्रमे महत्त्वपूर्णोऽयं विषयः यत् सायनस्फुटग्रहाः निरयणस्फुटग्रहाः वा साध्याः। तत्र नाडीक्रान्तिवृत्तयोस्सम्पातरूपस्य प्राक्पश्चाच्चलनं भ्रमणं दोलनमयनांशा इत्यत्र महान् विवादो दरीदृश्यते प्राचीनार्वाचीनसमवाये। ग्रहवेधं कृत्वा गणितागतस्य ग्रहस्य स्थूलत्वं सूक्ष्मत्वं वा निर्णीयते। यदि गणितागतः ग्रहः वेधेन तस्मिन् स्थाने न दृश्यते, तर्हि कल्पितस्वल्पान्तरमाने सूक्ष्मत्वमानीयते संस्कारान्तरं वा दीयते। अस्माकं शास्त्रेषु बहूनां यन्त्राणां वर्णनं विद्यते, ये वेधोपयोगिनः भवन्ति। तैरेव विद्ध्वा यथासमयं संस्कारान्तराणि च दत्वा सिद्धान्तज्योतिषशास्त्रस्य विस्तारो जातः। वेधार्थं संस्काराणामावश्यकता भवत्येव। यतोहि भूः स्थिरा नास्ति। तस्य चलनाद् इष्टस्थाने ग्रहादिपिण्डं स्वस्थानात् किञ्चित् चलितं दृश्यते। गणितेन साधिता ग्रहाः भूकेन्द्राभिप्रायिका भवन्ति। द्रष्टा तु पृष्ठे भवति, अतः दृङ्मण्डले भूपृष्ठस्थितेन जनेन तत्र ग्रहो न दृश्यते, यत्र गणितेन आयाति। मेषादिसम्पातबिन्दोश्चलनत्वात् साधितो ग्रहोऽयनांशैश्चलितो दृश्यते। अतस्तत्र अयनांशसंस्कारो विधीयते। नाडीक्रान्तिवृत्तयोः सम्पातः क्रान्तिपातरिति। 'पातानां वामतो गतिः' इत्युक्तेः मेषसम्पातः प्रतिवर्षमयनांशगतितुल्यं पृष्ठतो गच्छति। भास्कराचार्येण गोलबन्धाधिकारे वासनाभाष्ये प्रतिपादितम्- '[2]क्रान्त्यर्थं पातः क्रान्तिपातः। पातो नाम सम्पातः। कयोः? विषुवत्क्रान्तिवलयोः। नहि तयोः मेषादौ एव सम्पातः किन्तु तस्यापि चलनमास्ते। ये अयनचलनभागाः प्रसिद्धास्ते एव विलोमगस्य क्रान्तिपातस्य भागाः' इति। अयनचलनस्य चर्चा रोमशसिद्धान्ते शाकल्यब्रह्मसिद्धान्ते सोमसिद्धान्ते सूर्यसिद्धान्ते च दृश्यते। सिद्धान्तशिरोमणेरन्तरं रचितेषु सर्वेषु ग्रन्थेष्वपि विषयस्यास्य चर्चा वर्त्तते। अयनचलनवशात् सम्पातबिन्दुः पश्चिमायां दिशि याति। 'रवेश्चक्रभागोऽर्कवर्षं प्रदिष्टम्' इत्युक्तेरेकस्मिन् वर्षे यदि सूर्यः सायनमेषसम्पाते भवति, तदनन्तरं द्वितीयवर्षे तस्य भगणपूर्तिः वार्षिकायनांशगतिर्तुल्यं पूर्वमेव

---

1. सि. शि. स्प. अ. श्लो. 1
2. सि. शि. गोलबन्धाधिकार श्लोक 17 वासनाभाष्य

भविष्यति। अनेन प्रकारेण प्रतिवर्ष सायनमेषसम्पातः पृष्ठं गच्छति। एतदेव चलराशिचक्रमिति कथ्यते। चलराशिचक्रस्थिरराशिचक्रयोरन्तरमेवायनांशा भवन्ति।

प्राचीनाचार्यमतेन नाडीक्रान्तिवृत्तयोः सम्पातभ्रमणमयनचलनं कथ्यते। तत्र क्रान्तिमण्डलस्य यस्माद् बिन्दोः सूर्यस्योत्तरदिग्गमनं स एवोत्तरायणबिन्दुः, यस्माद् बिन्दोः दक्षिणदिग्गमनं स दक्षिणायनबिन्दुश्च कथ्यते। मकरकर्कटयोर्याम्यसौम्यायनत्वाद् उत्तरायणबिन्दुतो नवत्यंशान्तरेऽग्रे वसन्तसम्पातः, दक्षिणायनबिन्दुतोऽग्रे शरत्सम्पातश्च कथ्यते। वसन्तसम्पाततः शरत्सम्पाततश्च नवत्यंशान्तरेऽयनप्रोतवृत्तं जायते। अयनचलनस्य विषये शतपथब्राह्मणे उल्लिखितम्- **'तस्मात्कृतिकास्वादधीत । एताह वै प्राच्यैर्दिशो न च्यवंते**[1]। इत्यादिना मन्त्रेण कृत्तिकादीनां सायनमेषसम्पातासन्ने स्थिति एतदिति ज्ञायते। एवञ्च वेदाङ्गज्योतिषेऽपि उपलभ्यते-

प्रपद्येते श्रविष्ठादौ सूर्यचन्द्रमसावुद्क ।
सार्पार्धे दक्षिणार्कस्तु माघश्रावणयोः सदा[2]**॥**

इति लगधमुनेः वेदाङ्गज्योतिषोक्तवचसापि सूर्यचन्द्रयोः श्रविष्ठादौ सौम्यायनं सार्पार्धे दक्षिणायनं ज्ञायते। बृहत्संहितायामपि आचार्यवराहमिहिरेणोक्तम्-

आश्लेषार्द्धाद्दक्षिणमुत्तरमयनं रवेर्धनिष्ठाद्यम्।
नूनं कदाचिदासीद् येनोक्तं पूर्व शास्त्रेषु ॥
साम्प्रतमयनं सवितुः कर्कटकाद्यं मृगादितश्चान्यत् ।
उक्ताभावे विकृतिः प्रत्यक्षपरीक्षणैर्व्यक्तिः[3]**॥**

इति वराहमिहिरवचसा दक्षिणायनोत्तरायणयोः आरम्भ आर्द्रामूलनक्षत्रयोरर्धे भवति स्म इति ज्ञायते। अतः सम्पातस्य चलनं सिद्धयति। सूर्यसिद्धान्तेऽपि उल्लिखितम्-

त्रिंशत्कृत्यो युगे भानां चक्रं प्राक् परिलम्बते ।
तद् गुणाद् भूदिनैर्भक्तात् द्युगुणैर्यदवाप्यते ॥
तद् दोस्त्रिघ्ना दशाप्तांशा विज्ञेया अयनाभिधाः[4]**।**

यत्र सृष्ट्यादौ नाडीक्रान्तिवृत्तयोः सम्पातोऽऽसीत् स निरयणमेषादिः बिन्दुरासीत्। तदानीमयनांशाभावात्। ततोऽल्पगत्या पूर्वाभिमुखं सप्तविंशतिभागान् गत्वा ततः परावृतः स सम्पातस्तयैव गत्या प्रत्यङ्मुखं चलन्तः स्वस्थानमागत्य ततोऽपि पश्चिमं सप्तविंशतिभागान् याति ततः पुनरपि परावृतस्तत्तुल्ययैव प्राग्गत्या स्वस्थानं यदाऽऽयाति तावदष्टोत्तरशतांशचलनं भवति, तच्चैकं परिलम्बनमेको

1. श. ब्रा. 2/1/2
2. या. ज्यो. श्लो. 7, आ. ज्यो. श्लो. 6
3. बृहत्संहिता आदित्यचाराध्याय श्लोक 1-2
4. सूर्यसिद्धान्त त्रि. अ. श्लो. 9

भगणो वा तत्सम्पातबिन्दोर्भवति। अर्थात् यदा नाडीक्रान्तिवृत्तयोः सम्पातरूपमयनमुभयतः अष्टोत्तरशतमंशं चलति, तदा तस्यैको भगणो भवति। तस्य चलनमाचार्यैः वेधेन विज्ञाय ततो क्रान्तिपातस्य भ्रमणं दोलायनरूपेण स्वीकृतमर्थात् क्रान्तिपातः स्थिरमेषादिबिन्दुतः सप्तविंशतिभागैः पश्चाद् गत्वा पुनरनुलोमगत्या तदेव स्थानमायाति। एवमेकस्मिन् क्रान्तिपातभगणे **108^0** अंशाः भवन्ति। एकस्मिन् महायुगे **600** क्रान्तिपातभगणाः। अतो महायुगे तदंशाः **600$\times$108 = 64800^0।** एताः कलाः **6480060 = 3888000$'$।** तथा च एकस्मिन् महायुगे **4320000** सौरवर्षाणि भवन्ति। अतोऽयनस्य वार्षिकीगतिः **00$'$/54$''$** अर्थात् एकस्मिन् वर्षे **54$''$** विकलात्मकायनांशगतिः समायाति। सूर्यसिद्धान्तवत् रोमश-शाकल्य-ब्रह्म-सोमसिद्धान्तेष्वपि **600** दोलाभ्रमणानि भगणरूपाण्येकस्मिन् महायुगे स्वीकृतानि। यथा-

द्युगणः षट्शतघ्नोऽर्कशुद्धोदयहृतो ग्रहः[1] ॥
इत्येतदेतत् प्राक् चलनं युगे तानि च षट्शतम्[2] ॥
युगेषट्शत कृत्वो भचक्रं प्राग्विलम्बते[3]॥

आचार्य मुञ्जालेन **662** मितशकाब्दे तु एकस्मिन् कल्पे **199669** भगणाः अयनचलनस्य स्वीकृताः तेन यदि भगणे **360^0** स्वीकृत्य अयनगतिस्साध्यते तदानीं **59.9$''$** विकलाः वार्षिकीगतिः समायाति। भारतीयग्रहगणितपरम्परायां करणपद्धत्यां सौलभ्यार्थं वार्षिकीगति एककला स्वीकृता, किञ्च सायननिरयणवर्षसामञ्जस्येन तन्निराकर्तुं शक्यते। तत्र स्वल्पान्तरात् आचार्यश्रीगणेशदैवज्ञेन (**1507** मितशकाब्दे) ग्रहलाघवकरणग्रन्थे प्रतिवर्षमेककलातुल्यम् (**60** विकलात्मकम्) अयनचलनमङ्गीकृत्य गणितं कृतम्। सम्राट्सिद्धान्ते आचार्यश्रीजगन्नाथेन **1652** मितशकाब्दे **51$''$/27/50** विकलादिकायनगतिर्निर्धारिता। एवञ्च आचार्यश्रीकेतकरेण (**1854** मितशकाब्दे) केतकीग्रहगणितकरणग्रन्थे **50.2$''$** विकलात्मकमयनचलनमङ्गीकृत्य अयनांशगणितं कृतम्, तेन द्विसप्तत्युत्तरसहस्रद्वयतमे (**2072**) विक्रमाब्दान्ते प्रायः **24^0** अयनांशाः सिद्ध्यन्ति। वस्तुतोऽयनचलनमपि सर्वदैकरूपं नेति पाश्चात्या अपि स्वीकृतवन्तः। तेषां मते पञ्चाशत् आरभ्य अष्टपञ्चाशत् विकलापर्यन्तं तच्चलनं समयभेदेन भवति।

न्यूटनमहोदयेन भ्रमतो बालक्रीडाचक्रस्य दृष्टान्तेन प्रतिपादितं यत् भूः गोलाकारिका नास्ति, सा दीर्घगोलाकाराऽस्ति। अतस्तस्याकर्षणं गोलकेन्द्रं न एतेन रविग्रहयोराकर्षणप्रकर्षणादिगतिः सदा समाना न भवति, अतस्तयोराकर्षणं विलक्षणतया भुवोऽक्षः तत्कारणादेव क्रान्तिवृत्तस्य पृष्ठकेन्द्रं कदम्बं परितो भ्रमति। अत एव नाडीक्रान्तिवृत्तयोस्सम्पातबिन्दुरपि भ्रमन् दृश्यते। अनेन भ्रमणेन नाडीवृत्तपृष्ठकेन्द्रं प्रायः **26000** वर्षेषु कदम्बतारायाः पूर्णपरिक्रमां करोति। अयं वृद्धिरयनगतिः कथ्यते। पाश्चात्यपरम्परायां हिपार्कसमहोदयेनायनगतिराविष्कृतेति मन्यते, तदनुसारेणायनगतिः **36$''$** वार्षिकी स्वीक्रियते।

अयनांशसाधनस्यापि विभिन्नाः पद्धत्यः सिद्धान्तग्रन्थेषु प्रतिपादितास्सन्ति। संपातचलनस्य विषये विचारः क्रियते चेत्तदा रात्रौ अभीष्टकाले किमपि नक्षत्रं विध्येत्, तन्नक्षत्रं त्रिज्यागोले यत्र

1. रोमशसिद्धान्त स्प. अ. श्लो. 31
2. शाकलब्रह्मसिद्धान्त अ. 2 श्लोक 196
3. सोमसिद्धान्त स्प.अ. श्लोक 31

परिणतं तदुपरि वेधवलयं विनिवेश्य मेषादितस्तद् राश्यादिमानं विगण्य ज्ञेयम्। पुनर्द्वितीयदिने तावन्मितेष्टघट्यां तन्नक्षत्रं विद्ध्वा तदुपरिवेधवलयं निवेश्य मेषादितः तद् राश्यादिमानं विगण्य ग्राह्यम्। तथा कृते द्वयोः राश्यादिमानयोरन्तरं जायते, तेन सम्पातबिन्दौ गतिरस्तीति ज्ञायते। सम्पातस्य गतिः कुत्रेति जिज्ञासायां तद् गतिः क्रान्तिमण्डले भवति। यतः क्रान्तिमण्डलस्य च ध्रुवः कदम्बः स्थिरोऽस्ति, तदभितो नाडीमण्डलस्य ध्रुवो वृत्ते भ्रमति। तेन सम्पातगतिः क्रान्तिमण्डले जायते। अयनचलनस्य कारणविषये प्राचीनाचार्याः न किमपि कथितवन्तः। पाश्चात्यविचारेण भूभ्रमणवशाद् दिशः परिवर्तनेन विषुवसम्पातस्य अयनस्य चलनं जायते। भूमेः दीर्घवृत्तत्वात् तद् विचलनं स्वाक्षाभिमुखं भवति।

अयनांशानयनम्

सौरमतेन सृष्ट्यादौ नाडीक्रान्तिवृत्तयोः यत्र स्थितिरासीद् असौ निरयणमेषादिः कथ्यते। ततोऽत्यल्पगत्या सप्तविंशत्यंशमितं पूर्वाभिमुखं गत्वा ततः परावृत्य पुनः सम्पातबिन्दौ समागच्छति। ततः पश्चिमाभिमुखं तावन्मितं गत्वा पुनः सम्पाते समागच्छति, तच्चैकं परिलम्बनमेको भगणो वा कथ्यते। तस्य चलनं पूर्वाचार्यैः वेधेन परिज्ञाय ततोऽनुपातेनैकस्मिन् महायुगे भगणमानं विज्ञातम्। सायनविषुवद्दिने सूर्यो सायनमेषादौ भवति। तस्मिन् काले राश्यादिस्पष्टसूर्यः **0।0।0।0** भवति। तस्मिन् काले अस्य गणितागतेन निरयणसूर्येण सह यदन्तरं तेऽयनांशाः। भास्कराचार्येण तदानयनाय स्वकीया युक्तिरेवं प्रदत्ता –‘[1]एवं विध्यता यस्मिन् दिने सम्यक् प्राच्यां रविः उदितो दृष्टः तद् विषुवद् दिनम्। तस्मिन् दिने गणितेन स्फुटो रविः कार्यः तस्य रवेर्मेषादेश्च यदन्तरं तेऽयनांशाः। एवमुत्तरगमने सति। दक्षिणे तु तस्यार्कस्य तुलादेश्चान्तरमयनांशाः’। एतेन सिद्धयति यत् सायनसूर्यनिरयणसूर्ययोरन्तरांशा एवायनांशा भवन्ति।

प्रायः सर्वैः सिद्धान्तकारैः अयनांशज्ञानायेयमेव पद्धतिः स्वीकृता। एवमुपलब्धायनांशैः वार्षिकायनगतेरनुपातेन तदयनांशसम्बन्धिवर्षाणां ज्ञानं कृत्वा विलोमं संस्कृत्य निरयणवर्षो ज्ञायते। यथा ग्रहलाघवकरणग्रन्थे **444** शकः। तदनन्तरं गतवर्षे वार्षिकगतिज्ञानाद् अनुपातेन इष्टायनांशज्ञानं भवति। अनेन प्रकारेण सौरेऽपि उक्तम्–

स्फुटं दृक्तुल्यतां गच्छेदयने विषुवद् द्वये।
प्राक् चक्रं चलितं हीने छायार्कात् करणागते॥
अन्तरांशैरथावृत्य पश्चाच्छेषैस्तथाधिके[2]॥

यत्र बिन्दौ परमां काष्ठां गतोऽर्कस्ततः प्रतिकूलदिशि परावर्तितो भवति, स एवायनादि बिन्दुः, तत्र रवेः परमगमनत्वात् तत् क्रान्तेरपि परमत्वं भवति। क्रान्तिप्रवृत्तिः तु नाडीक्रान्तिवृत्तसम्पातबिन्दुतो भवति। स च सम्पातोऽधुना निरयणमेषादितोऽयनांशतुल्यमन्तरितो जायते। अतो वर्त्तमानसम्पाते क्रान्तेरभावः ततः क्रमोपचयात् त्रिभान्तरे अर्थात् सायनमकरादौ सायनकर्कादौ च क्रान्तेः परमत्वं तदेवायनस्थानम्। तथा च क्रान्तेरभावस्थाने रवेर्विषुवद् वृत्ते भ्रमणत्वात् मेषादौ तुलादौ च विषुवद् दिनमिति परिभाष्यते। अतः सायनविषुवद्दिने सायनारम्भदिने च साधिता क्रान्तिः क्रमेण शून्यसमा यदि भवेत् तदा सायननिरायणार्कयोरन्तरूपमयनचलनं स्फुटं दृक्तुल्यं भवेदिति निष्कर्षः। अत्र ‘प्राक् चक्रं चलिते हीने छायार्कात् करणागते’ इत्यनेन छायातः साधितरवेः सायनत्वम्, करणागतसाधितरवेः निरयणत्वं च

1. सि. शि. पाताधिकारवासना पृ. 162
2. सू. सि. श्लोक 3/11–11.5

सिद्ध्यति। अतः हि प्राचीनाचार्यवर्याणां मतेन छायासाधितसूर्य करणागतसाधितसूर्ययोरन्तरांशमानमेवायनांशमानं भवति।

भारतीयानां ग्रहलाघवकरणग्रन्थे अयनगतेः वार्षिकं मानमेककलातुल्यं स्वीकृतम्। आधुनिकैस्तु **50.2''** मानं स्वीक्रियते। भिन्न-भिन्नसिद्धान्तग्रन्थेषु रविस्पष्टीकरणे कश्चिद् भेदो दृश्यते, अत एव तेषां वार्षिकी अयनगतिः काचिद् भिन्ना वर्त्तते। येन स्व-स्वकाले सिद्धान्तग्रन्थकारैः ग्रहाद्यानयनं कृत्वा ततन्मतैरयनांशाः ज्ञाताः। तत् तत् काले सिद्धान्तज्ञैः साधिताः ग्रहाः दृक्सिद्धाः आसन्, किन्त्वद्यत्वेऽयनगतेर्भिन्नत्वात् वर्तमानगत्याधारेण अयनांशसंस्कृताः ग्रहाः दृक्सिद्धा भवन्ति।

ग्रहस्पष्टीकरणोपक्रमेऽयनांशोपयोगित्वम्

नक्षत्राणां ध्रुवांकानां स्खलनकारणेन स्पष्टग्रहेषु दृक्कर्मसंस्कारे वेधेन सत्यापनकाले समस्योत्पद्यते। नक्षत्राणां ध्रुवीयध्रुवके स्वगतिवशाच्चलनत्वादन्तरं कदम्बेऽपि जायते। तेन प्रदत्तध्रुवकेषु परस्परविसम्वादो जायते। तन्निराकरणार्थमयनांशज्ञानं महत्त्वपूर्णं विद्यते।

अयनचलनवशात् ग्रहाणां मध्यमशरमानेषु मन्दशीघ्रपरिध्योर्मानेषु, मन्दशीघ्रफलमानेषु किं वा खगोलीयनियामकेऽन्तरमुत्पद्यते। अतः ग्रहगणितपरम्परायां स्थूलत्वं समायाति। एतेषां निराकरणार्थमयनांशस्यावश्यकता भवति।

ग्रहाणां सायननिरयणराशिसङ्क्रमणसाधने यदन्तरं समायाति, तदपाकरणाय अयनांशज्ञानमपेक्ष्यते।

ग्रहाणां निरयणसायनभोगभेदात् निरयणसायनवर्षयोः महदन्तरमुत्पद्यते। सर्वेषां ग्रहाणां मध्यभगणेष्वयनतुल्यमन्तरमुत्पद्यते। एवमेव नाक्षत्रवर्षेषु ग्रहभगणेष्वप्यन्तरमुपलभ्यते। किञ्च ग्रहाणां स्पष्टीकरणे सूक्ष्मत्वसम्पादनायायनांशस्य ज्ञानं महत्त्वपूर्णम्।

सायननिरयणग्रहयोरन्तरं कर्तुं ग्रहगणितप्रक्रियायां दिग्देशकालेति त्रिप्रश्नरीत्या छायातो वेधविधिना ग्रहसाधनेऽयनांशज्ञानमावश्यकं भवति।

वेधशालासु राशिवलयकपालादियन्त्राणां विन्यासेऽपि चलयन्त्राणामवस्थितिनिर्धारणायाय-नांशज्ञानमपेक्षते।

श्रौतस्मार्तयागादीनां निर्धारणे सायननिरयणोरन्तरज्ञानं परमावश्यकं भवति।

वस्तुतस्तु ग्रहस्पष्टीकरणप्रक्रियायां स्पष्टग्रहाः सायनपद्धत्या साध्याः अथवा निरयणपद्धत्या साध्या इति विवादितोऽयं पक्षः। वस्तुतः उभयोरपि पक्षयोः स्वीयाभिमतं दृढतरम्। तत्र सायनवादिभिः ग्रहसाधनपरम्परामवलम्ब्याभिरुच्यते यज्ज्योतिषशास्त्रस्य प्रत्यक्षत्वाद् सिद्धान्तस्य दृश्यत्वप्रसङ्गेऽयनज्ञानं परमावश्यकम्। किञ्च स्फुटग्रहा एव दृक्तुल्यतां यान्ति, किञ्च **'खेटैस्फुटैरेव फलस्फुटत्वमिति'** भास्करवचनादपि दृश्यसायनस्पष्टग्रहा एवोपयुक्ताः। आधुनिकैरपि सर्वैं एष एव पक्षः स्वीक्रियते। परं निरयणवादिभिरिदमुच्यते यदयनांशसंस्कृतग्रहाः दृग्विषयाणां यथा ग्रहणयुतिश्रृङ्गोन्नत्यादीनां कृते तु उपयुक्ताः परं तिथ्यादीनां साधनार्थं फलादेशार्थञ्च वैदिकलौकिकयज्ञानां सम्पादनार्थञ्च नाक्षत्राभिप्रायिकी ग्रहाणामवस्थितिरेव फलोत्पादिका। यतोहि वैदिकानां नक्षत्रपुञ्जेष्वेव प्रसक्तिः। किञ्च नक्षत्राणां नहि सम्पातगतमन्तरं स्वपुञ्जानुरोधेनैवावस्थितिरिति कृत्वा ऋतुधर्मपर्वादीनां निर्णये एष एव निरयणपक्षो गृह्यते। अत्र साम्प्रतिकेषु विविधपञ्चाङ्गेषु निरयणपक्षस्यैवाधिकाः समर्थकाः दरीदृश्यन्ते, स एव पक्षः भारतीयवैदिकरीत्या समीचीनोऽपि प्रतिभाति।

अपवर्गबीजचिन्तनम्

डॉ. बिष्णुपदमहापात्रः

इह खलु जगति धर्मार्थकाममोक्षाख्यपुरुषार्थचतुष्टये मोक्षस्यैव प्राधान्यात् संसारदुःख-वासनादिनिवृत्तिरूपत्वात् सांसारिकदुःखवासनानां चासह्यत्वात् न्याय-दर्शनानुसारेण मोक्षप्रयोजकी-भूतज्ञानसिद्ध्यर्थं तादृशज्ञानविज्ञेयपदार्थसमूहनिरूपणार्थं विवेचकानां प्रवृत्तये **''प्रमाणप्रमेयसंशयप्रयोजन-दृष्टान्तसिद्धान्ताऽवयवतर्कनिर्णयवादजल्पवितण्डाहेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञाना-न्निःश्रेयसाधिगमः''**[1]इति परमकारुणिको भगवान् अक्षपादः आदावसूत्रयत्। न्यायसूत्रकारस्याशयं विवृणोति मणिकारः **''अथ जगदेव दुःखपङ्कनिमग्नमुद्दिधीर्षुरष्टादशविद्यास्थानेष्वभ्यर्हित-तमामान्वीक्षिकीं परमकारुणिको मुनिः प्रणिनाय''**[2] इति।

''ऋते ज्ञानान्न मुक्तिः, विद्ययाऽमृतमश्नुते, विद्यया विन्दतेऽमृतम्'' इत्यादिश्रुत्या ज्ञायते यत् तत्त्वज्ञानमन्तरा अपवर्गस्यावाप्तिः नैव सम्भवतीत्यतः तत्त्वज्ञानस्यास्ति अपवर्गसाधनत्वमिति। तादृशतत्त्वज्ञानप्राप्तये समे दार्शनिकाः वैयाकरणाः साहित्यिकाः पौराणिकादयश्च सततं प्रयत्नशीलाः दरीदृश्यन्ते। तत्त्वज्ञानेन यो हि मोक्षः, स चापवर्गः आत्यन्तिकदुःखनिवृत्तिरूपः। आत्यन्तिकदुःखनिवृत्तेः मोक्षरूपत्वे नास्ति काचिद् विप्रतिपत्तिः। उक्तं च किरणावल्यामुदयनाचार्येण **''निःश्रेयसं पुनर्दुःखनिवृत्तिरात्यन्तिकी, अत्र च वादिनामविवाद एव। न ह्यपकृस्य दुःखं प्रत्यापद्यत इति कश्चिदभ्युपैति''**[3] इति। न्यायसूत्रकारैः 'दुःखेनात्यन्तं विमुक्तश्चरती'ति श्रुत्यनुसारं **''तदत्यन्त-विमोक्षोऽपवर्गः''**[4]अर्थात् **''बाधनालक्षणं दुःखम्''**[5] पीडास्वरूपं सत् यद् दुःखं तत्र वस्तुतो दुःखमात्मसमवेतमेव अथापि तादृशदुःखजनकत्वात् शरीरादिकमपि दुःखमित्युच्यते। **''एतदेव शरीररादि बाधनानुषाङ्गाद् दुःखमित्युच्यते, स्वभावतस्तु दुःखमेव दुःखम्''**[6]। दुःखसाहित्येन वर्तमानं सर्वमेव शरीरादिकं दुःखयोगाद् दुःखमित्युच्यते, यथा मधुरसंयोगात् मधुरमित्युच्यते। सोऽयं दुःखी सर्वं दुःखयुक्तमिति जानानः दुःखस्यानिष्टत्वाद् दुःखं जिहासुर्जन्मनि दुःखदर्शी संसाराद्विरुः सन् अपवर्गपदं लभते। तथा च संसारे किञ्चित्सुखे सत्यपि अपवर्गसाधनीभूतनिर्वेदस्य सिद्ध्यर्थं सर्वस्य दुःखमयत्व-मुच्यते।

---

1 न्या. सू.- 1/1/1
2 प्रामाण्यवाद, पृ.- 07
3 किरणावली, पृ.- 49
4 न्या. सू.- 1/1/22
5 न्या. सू.- 1/1/21
6 न्या. वार्त्तिकम्- 1/1/21

तथाह महर्षिपतञ्जलि: **''परिणामतापसंस्कारदु:खैर्गुणवृत्तिविरोधाच्च दु:खमेव सर्वं विवेकिन:''**[1] इति। यस्यामवस्थायामुक्तयो: फलहानोपादानयो: दु:खस्य वा अत्यन्तसमाप्तिर्भवति साऽवस्थाऽपवर्ग: इत्युच्यते। दु:खस्यात्यन्तनिवृत्तिरेवाऽपवर्गपदार्थ:, प्रलयानन्तरं सर्वे पुनर्दु:खभोगस्यावश्यम्भावाद् न प्रलयेऽत्यन्तदु:खनिवृत्ति: सम्भवति। अपवर्गानन्तरं तु न दु:खभोगसम्भवोऽस्तीत्यपवर्गे दु:खस्यात्यन्तनिवृत्ति: सम्भवति दु:खनिवृत्तेरात्यन्तिकत्वञ्च पुनरनुत्पाद एव। वर्द्धमानोपाध्यायैस्तावत् **''अथ दु:खेनात्यन्तं विमुक्तश्चरतीति श्रुतेस्तदत्यन्त-विमोक्षोऽपवर्ग इति सूत्राच्च दु:खात्यन्ताभावो मोक्ष:''**[2] इति प्रतिपादितं मोक्षस्वरूपम्। **''त्रिविधदु:खात्यन्तनिवृत्तिरत्यन्तपुरुषार्थ:''**[3] **''एषां त्रिविधदु:खानां यात्यन्तनिवृत्ति: स्थूलसूक्ष्मसाधारण्येन नि:शेषतो निवृत्ति:''**[4] इति सांख्यमतमभ्युपेत्य किरणावलीकार: उदयनाचार्य: वक्ति–**''सांख्यानामपि दु:खनिवृत्तिरपवर्ग इत्यत्र न विप्रतिपत्ति:। प्रकृत्याश्रयं दु:खं, न पुरुषाश्रयमिति विवाद:''**[5] इति।

